-B

# श्री रत्नपाल नृप चरित्रम्



પ્રકાશક
શ્રી સ્મૃતિમંદિર પ્રકાશન
અમદાવાદ

संपादकाः
पू. आचार्यविजय योगतिलकसूरीश्वराः
पू. मुनिश्री धर्मतिलकविजयाः

वाचनाचार्यश्रीसोममण्डनगणिविरचितं

# ॥ श्री रत्नपालनृप चरित्रम् ॥

कृपावृष्टिः

पूज्यपाद आचार्यदेवेश श्रीमद् विजय जिनचन्द्रसूरीश्वरजी महाराजा

पूज्यपाद आचार्यदेवेश श्रीमद् विजय नरचन्द्रसूरीश्वरजी महाराजा

पूज्यपाद आचर्यदेवेश श्रीमद् विजय श्रेयांसप्रभसूरीश्वरजी महाराजा

: निमित्त :

वात्सल्यवारिधि-वर्धमानतपोनिधि-पूज्यपादाचार्यदेवेश
श्रीमद् विजय नरचन्द्रसूरीश्वराणां पञ्चाशद्वर्षीय -
संयमजीवनस्यानुमोदनार्थम्

: संपादकौ :

पू. आचार्यविजय योगतिलकसूरीश्वराः

पू. मुनिश्री धर्मतिलकविजयाः

प्रकाशकम्

श्री स्मृतिमंदिर प्रकाशनम्—कर्णावती

સૂરિમંત્ર સમારાધક ગ્રન્થશ્રેણિ ક્રમાંક :— ૧૨

પુસ્તક : શ્રી રત્નપાલનૃપ ચરિત્ર (પદ્ય)

આવૃત્તિ : ત્રીજી નકલ : ૫૦૦

પ્રકાશન : વિ. સં. ૨૦૬૩, ચૈત્ર સુદ ૧૩

આશીર્વાદ : આશ્રિતગણ હિતચિંતક સૌજન્યમૂર્તિ આચાર્યદેવેશ શ્રીમદ્ વિજય **જિનચન્દ્રસૂરીશ્વરજી** મહારાજા. સુવિશાલ-ગચ્છાધિપતિ, પરમ શ્રદ્ધેય પૂજ્યપાદ આચાર્યદેવેશ શ્રીમદ્ વિજય **હેમભૂષણસૂરીશ્વરજી** મહારાજા. સૂરિમંત્ર પંચ - પ્રસ્થાનસમારાધક પૂજ્યપાદ આચાર્યદેવેશ શ્રીમદ્ વિજય **શ્રેયાંસપ્રભસૂરીશ્વરજી** મહારાજા.

લાભાર્થી : વર્ધમાનતપોનિધિ પૂ. મુ. શ્રી **નયભદ્રવિજયજી** મ.સા.ના ઉપદેશથી શ્રી મનમોહનપાર્શ્વનાથ જૈન દેરાસર ટ્રસ્ટ જ્ઞાનનિધિ–પૂના.

પ્રકાશક : **શ્રી સ્મૃતિમંદિર પ્રકાશન**

દિનેશભાઈ / રમેશભાઈ જૈન

૧૨, સ્વસ્તિક એપા. જૈનદેરાસર સામે, શાંતિનગર, ઉસ્માનપુરા, આશ્રમરોડ, અમદાવાદ.

કિંમત : રૂ. ૪૦-૦૦ (આ પુસ્તક વેચાણ માટે નથી)

(ગૃહસ્થોએ છાપેલી કિંમત જ્ઞાનખાતે જમા કરીને માલિકી કરવી. વાંચન માટે યોગ્ય નકરો ભરવો.)

**: વિદ્વાનોને વિનંતિ :**

આ અને આવા આગામી સંપાદનોમાં જે જણાવવા જેવું લાગે તે અને આપનો અમૂલ્ય અભિપ્રાય નિઃસંકોચ નીચેના સ્થળે મોકલાવશો.

**સંપાદક**

દ્વારા - અરવિંદભાઈ બાવાલાલ

આઝાદ ચોક, ભાભર. જિ. બનાસકાંઠા-૩૮૫૩૨૦

# अर्हम्

## ॥ प्रस्तावना ॥

अस्य दानमाहात्म्यप्रतिबद्धस्य श्रीरत्नपालनृपकथानकस्य कर्त्तारो वाचनाचार्यश्रीसोममण्डनाभिधानाः श्रीबृहत्तपागच्छशृङ्गारहारोपम-युगोत्तमाचार्यपुरन्दरश्रीमन्मुनिसुन्दरसूरीणां विनेया अभूवन्, इति कथानकस्यास्य प्रशस्तौ स्फुटमेव । यद्यपि ग्रन्थकर्तृभिरत्र स्वसत्तासमयः क्वापि नोपनिबद्धस्तथापि ग्रन्थस्यास्य प्रशस्तिमध्यवर्त्तिना—

"मुनिसुन्दरसूरीशपट्टे विजयिनोऽधुना ।
श्रीरत्नशेखरगणाधीशा वः शिवसम्पदे ॥"

इत्येतेन पद्येन श्रीरत्नशेखरसूरीणां सत्तासमये आत्मनोऽपि सत्तासमयः प्रकटीकृतस्तैः; किञ्च श्रीमन्मुनिसुन्दरसूरिरत्नशेखरसूर्योर्विद्यमानत्वं त्वेताभ्यामेव स्वकृतेष्वनेकग्रन्थेषु महोपाध्यायश्रीमद्धर्मसागरगणिविरचितायां पट्टावल्यां च विक्रमार्कीयपञ्चदशशताब्द्यां प्रकटितमेव, अतः श्रीमन्मुनि-सुन्दरशिष्यत्वेनामीषामपि समयोऽनन्तरोक्त एवेति प्रतिपादने नात्रासमी-चीनम् ।

एतद्ग्रन्थप्रणेतृभिरन्येऽपि ग्रन्थाः कृता भवेयुः परं कति किंविषयाः ?। इति नाद्यापि निर्णयपथमवतीर्णम् ।

अस्मिन् कथानके दानमाहात्म्यं विवृण्वद्भिः कविभिरादौ परस्पर-संजातविवादानां दानशीलतपोभावानां वादनिराकरणयुक्त्युद्धटनम्, तदनन्तरं कथानायकस्यास्य रत्नपालनृपतेर्जन्मतः समारभ्य सुरसद्मप्राप्तिपर्यन्तं सुपात्रप्रासुकपानीयदानफलोपभोगाविर्भूतानेकाश्चर्यावहस्य चारुचरित्रस्या-विष्करणम्, अस्य पट्टराज्ञ्याः शृङ्गारसुन्दर्याः समुत्पन्नेऽपि महत्युपसर्गे शील-रक्षादृढत्वोद्भावनम्, प्रासङ्गिकोदाहरणनिरूपणम्, पूर्वभवस्वरूपशंसनम्, इत्यादि समग्रमपि चरित्रं व्यावर्णितमस्ति; तत्तु स्वयमेवावभोत्स्यते बुद्धि-मद्भिरिति नास्माकमत्रातिकथनीयम् ।

एतत्कथानकपुस्तकगवेषणापरायणेन मया भूयो भूयः प्रायतिषि परं केवलं श्रीमन्मोहनलालमुनीनां सूर्यपुर ( सुरतबन्दर ) स्थज्ञानमन्दिरात्प्रायो नातिशुद्धाशुद्धं पुस्तकद्वितयमेव संप्राप्तम्, एतन्मात्रशोधनसाधनावलम्बनेनैव सूक्ष्मदृष्ट्या संशोधितेऽप्यत्र निबन्धे मदीयदृष्टिदोषेणाक्षरयोजकदोषेण वा यत्र क्वचनाशुद्धिः कृता जाता वा भवेत्तत्र संशोधनीयं शुद्धशेमुषीसंशोधित-कल्मषैः कृपालुभिरिति प्रार्थयते—

प्रवर्त्तकश्रीमत्कान्तिविजयपादपाथोजपरागः

ता. १-१-१३ प्रकल्पिताञ्जलिः

खेडा **चतुरविजयो मुनिः**

## : પ્રાપ્તિસ્થાન :

(૧)

**રાજેશભાઇ જે. શાહ**
બી-૨૫, શક્તિકૃપા સોસાયટી,
ડૉ. બ્રહ્મભટ્ટ હોસ્પીટલ પાછળ,
અરૂણાચલ રોડ, સુભાનપુરા,
વડોદરા–૩૯૦૦૨૯.

(૨)

**દિપકભાઇ જી. દોશી**
કાપડના વ્હેપારી,
દેપાળાવાડ સામે,
વઢવાણસીટી-૩૬૩૦૩૦.

(૩)

**મયૂરભાઇ દવે**
મહારાષ્ટ્ર ભુવન જૈન જ્ઞાન ભંડાર,
પાલિતાણા-૩૬૪૨૭૦ (સૌરાષ્ટ્ર)

(૪)

**અમૃતભાઈ કે. શેઠ**
કડિયાવાસ, રાધનપુર,
જી. પાટણ–૩૮૫૩૪૦.

પોસ્ટથી મંગાવનારે - વઢવાણથી મંગાવવી.

# પ્રાસ્તાવિકમ્

અપશ્ચિમ તીર્થંકર શ્રીવીરવિભુની ૫૨મી પાટ જેમના થકી શોભી હતી તે આચાર્યદેવશ્રીમુનિસુંદરસૂરીશ્વરજી મહારાજાના પુણ્યનામધેયથી કોણ અજાણ છે? તેમના જ વિનેયરત્ન વાચનાચાર્ય શ્રીસોમમંડન ગણિએ બનાવેલ એક સુપાઠ્યચરિત્ર-રત્નપાળના જીવન વૃત્તને વર્ણવતું-અત્રે પ્રસ્તુત છે.

**ગ્રન્થકાર :-** ગ્રન્થકારનું ખુદનું વિશેષ જીવનચરિત્ર તો જો કે પ્રાપ્ત નથી પણ ટેટા વડ જેવા જ હોય એ ન્યાયે શિષ્ય ગુરુને અનુસરનારા જ હોય એમ અનુમાન થઈ શકે છે. જે મહાનગુરુપરંપરા ગ્રન્થકારશ્રીને પ્રાપ્ત થઈ છે તેનું વર્ણન થઈ શકે તેમ નથી. તેમની ગુરુપરંપરા માટે જિજ્ઞાસુઓને સોમસૌભાગ્યમહાકાવ્ય અધ્યાત્મકલ્પદ્રુમની મો. ગી. કાપડીયાની પ્રસ્તાવના વિગેરે જોવા ભલામણ છે.

**તેઓશ્રીજીના અંન્ય ગ્રન્થો :-** પ્રસ્તુત ગ્રન્થકારશ્રી સોમમંડન ગણિવરે બનાવેલા અન્ય બે ગ્રન્થો હાલ મળે છે. પહેલો છે युगादि देशना જે લગભગ ૨૫૦૦ શ્લોક પ્રમાણ છે જેમાં અનેક બોધદાયક દૃષ્ટાંતોની ગૂંથણી ખૂબજ સરળ સંસ્કૃત પદ્યોમાં કરવામાં આવી છે. આ ગ્રન્થ વિ. સં. ૨૦૪૫માં પૂ.આ. શ્રી જિનેન્દ્રસૂરીશ્વરજી મ.સા. દ્વારા સંપાદિત થઈ પ્રગટ થયો છે. તથા આ. વિ. ચિદાનંદસૂરિજી મ. ના સાનુવાદ સંપાદન દ્વારા પણ પ્રગટ થયેલ છે. બીજો ગ્રન્થ છે : उत्तमनरेन्द्रकथानकम् જે ૮૧૨ શ્લોક પ્રમાણ છે. આ ગ્રન્થ અપ્રગટ છે તેની એક હસ્તપ્રત શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર કોબામાં છે. [પ્રકાશન વિચારણા ધિન છે.]

**ગ્રન્થ :-** સુપાત્રને અપાયેલ માત્ર પાણીનું દાન પણ આત્માને કેટલો ઉંચે લઈ જવા સક્ષમ છે તે આ ચરિત્રનો મુખ્ય વર્ણનવિષય છે. ગ્રન્થકારશ્રીએ ઉપાડ ખૂબજ મજેનો કર્યો છે. દાન-શીલ-તપ અને ભાવમાં કોણ ચડે ? આપણી દૃષ્ટિએ જવાબ સીધોને સટ છે. પૈસો- જે દૂરની વસ્તુ

છે- છોડો તો દાન ધર્મ થઈ શકે છે. જ્યારે શીલધર્મ માટે ભોગો છોડવાના છે. જે એનાથી અઘરૂં છે. તપ ધર્મની તો શરત વળી એથીય આકરી છે. જે તમારું જીગરજાન છે, જેને તમે ખૂબ પાળ્યુ છે, પંપાળ્યુ છે તેવા શરીર પર કઠોરતા લાવવી પડશે અને ભાવધર્મ જનમ જનમના મમતાના બંધનો છૂટે તો જ આવે, સૌથી કપરૂં કામ. આ એક દૃષ્ટિકોણ છે બીજો દૃષ્ટિકોણ એવો ય છે કે

दानशील-तपोभाव-भेदाद्धर्मं चतुर्विधम् ।
मन्ये युगपदाख्यातुं, चतुर्वक्त्रोऽभवद् भवान् ॥ વી.સ્તો.૧-૪ ॥

ગ્રન્થકારશ્રી નવતરવાત મૂકે છેઃ દાન જ સૌથી શ્રેષ્ઠ છે. કેવી રીતે? પાછળના ત્રણના આરાધનથી તો આરાધક એક જ મોક્ષે ચઢે છે જ્યારે દાનધર્મમાં દેનાર અને લેનાર બન્ને મોક્ષમાર્ગમાં આગળ વધે છે આ એક જ વાત દાનને ચારેયમાં મોખરાનું સ્થાન અપાવી દે છે.

આટલી પીઠિકામાં પ્રથમ પરિચ્છેદ પૂર્ણ થાય છે. પછી સુપાત્રદાન અંગે રત્નપાળરાજાનું સવિસ્તર જીવન આલેખાયું છે જેનો વિષય તો બૃહદ્-વિષયાનુક્રમથી જાણી શકાશે, ગ્રન્થ ખૂબજ સહેલી ભાષામાં રચાયો છે. સંસ્કૃત પદ્ય વાંચનના શરૂઆતના અભ્યાસુને ઉપયોગી થાય એવું છે અને એજ ઉદ્દેશથી તેનું પુનઃ સંપાદન કરવામાં આવ્યું છે.

**પુનઃ સંપાદન :-** આ ગ્રન્થનું પૂર્વસંપાદન પૂ. મુનિશ્રી ચતુરવિજયજી મ.સા.એ કરેલુ, તેના જ આધારે આ સંપાદન કર્યું છે તેઓશ્રીએ જે ટીપ્પણીઓ કરેલી તે યથાવત્ રાખી છે અમોએ જે કેટલેક સ્થળે નવી ટીપ્પણીઓ ઉમેરી છે તે અંગ્રેજી આંકથી દર્શાવી છે સંસ્કૃત અંકોવાળી તમામ ટીપ્પણી પૂર્વ સંપાદકશ્રીની જ છે આગળ બૃહદ વિષયાનુક્રમ તથા બે પરિશિષ્ટો નવા જોડ્યા છે જે અધ્યેતાઓને ઉપયોગી થશે.

આવા ગ્રન્થોના અધ્યયન દ્વારા આત્માને ઉર્ધ્વગતિમાં મોકલવાનુ આપણા સૌનુ અંતિમ લક્ષ્ય વહેલામાં વહેલું પ્રાપ્ત થાય એજ એકની એક અને સદાની શુભાભિલાષા.

**- આચાર્ય વિજય યોગતિલકસૂરિ.....**

# निमित्त मात्रोऽहम्

પરમતારક પરમાત્માના શાસનના રહસ્યને સરળતાથી સમજાવવા માટે ધર્મકથાનુયોગનું વર્ણન શાસ્ત્રોમાં આવે છે. દ્વાદશાંગી પૈકી છઠ્ઠા અંગસૂત્ર શ્રી જ્ઞાતાધર્મકથાંગ સૂત્રમાં ૩ાા (સાડાત્રણ) કરોડ કથાઓ હતી તેમજ શ્રી ઉપાશક દશાંગ આ બન્ને ગ્રંથો ધર્મકથાનુયોગના છે તેને આશ્રયીને આજ સુધી અનેકાનેક મહાપુરુષોએ વિવિધ વિષયની અનેક ધર્મકથાઓ બનાવી છે.

તે પૈકી આ પ્રસ્તુત ગ્રંથ શ્રી રત્નપાલનૃપચરિત્રના કર્તા સહસ્રાવધાની પૂજ્યપાદ આ.ભ.શ્રી વિજય મુનિસુંદરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન વાચનાચાર્ય શ્રી સોમમંડન ગણિવર છે. આ કથા મુખ્યત્વે ધર્મના ચાર પ્રકારો દાન-શીલ-તપ-ભાવ. પૈકી શીલ ધર્મ ઉપર ૮૭૫ શ્લોક પ્રમાણ રચવામાં આવી છે. અવાન્તર કથાઓ દ્વારા આ ગ્રંથને ખૂબજ રોચક બનાવવામાં આવ્યો છે.

આજ કથા શ્રીધર્મકલ્પદ્રુમ ગ્રંથમાં પલ્લવ-૪ અને -૫માં કુલ શ્લોક-૧૩૨૩ માં આગમગચ્છીય શ્રી ઉદયધર્મગણિવરે રચેલી છે.

આ ગ્રંથ બેવાર વાંચતા-વંચાવતા ગમી ગયો અને વિચાર આવ્યો કે આને પુનઃ પ્રકાશિત કરવામાં આવે તો જરૂર વાચક ગણને લાભ થાય તે ઉદેશથી મારા ભવોદધિ તારક પરમારાધ્યપાદ પરમતારક ગુરુદેવશ્રીજીની કૃપા બળે તેમજ મારા જ્ઞાનદાતાગુરુદેવ આશ્રિતગણહિતચિંતક પૂજ્યપાદ આ.ભ.શ્રી **વિજય નરચન્દ્રસૂરીશ્વરજી** મ.સા. તથા મારાદીક્ષાગુરુદેવ સૂરિમંત્રપંચપ્રસ્થાન સમારાધક પૂજ્યપાદ આ.ભ.શ્રી **વિજય શ્રેયાંસપ્રભસૂરીશ્વરજી** મ.સા.ના શુભાશિર્વાદથી આચાર્ય**વિજય યોગતિલકસૂરિજી** મ. તથા મુનિશ્રી શ્રુતતિલકવિજયજી મ.ના સહયોગથી આ સંપાદન થયું છે. જોકે હું તો નિમિત્તમાત્ર છું બાકી તો મુખ્યકામ્ તો મુનિશ્રી શ્રુતતિલકવિજયજી મ. દ્વારા થયું છે. પ્રાન્તે આ ગ્રંથના વાંચન-મનન દ્વારા દુર્લભ એવા માનવ જીવનને શીલધર્મમય બનાવી પ્રાન્તે પરમપદને પામનારા બનીએ એજ શુભાભિલષા.

ભવોદધિતારક ગુરુદેવવિજય રામચન્દ્રસૂરીશ્વરજી મહારાજાનો વિનેય

મુનિ ધર્મતિલકવિજય

અ. સુ. ૬. ૨૦૬૩

શાંતિભુંવન. જામનગર

## " भवदीयं भवद्भ्यः समर्पयामि "

સૂરિપ્રેમનાપ્રથમપટ્ટાલંકાર સુવિશાલ-ગચ્છાધિપતિ વ્યાખ્યાનવાચસ્પતિ સ્વ. પૂજ્યપાદ આચાર્યદેવેશશ્રીમદ્ **વિજય રામચન્દ્રસૂરીશ્વરજી-મહારાજાના** વિનેયરત્ન કલિકાલનાધન્નાઅણગાર સચ્ચારિત્રપાત્ર સ્વ. પૂજ્યપાદ પંન્યાસપ્રવર **શ્રી-કાંતિવિજયજી** ગણિવરના સુવિનીતપટ્ટધરરત્ન વાત્સલ્યવારિધિ વર્ધમાનતપોનિધિ આંશ્રિતગણ-હિતચિંતક પૂજ્યપાદ આચાર્યદેવેશશ્રીમદ્ **વિજય નરચન્દ્રસૂરીશ્વરજી મહારાજા**

આપના પુણ્યપસાયે જ્ઞાનયોગમાં યત્કિંચિત્ પ્રગતિ સાધી શક્યો છું. તેના જ ફળ સ્વરૂપે આજે આ સંયુક્ત સંપાદિત **શ્રીરત્નપાલનૃપચરિત્ર પદ્ય** આપના **૫૦** વર્ષીય નિર્મળ સંયમજીવનની અનુમોદનાર્થે

આપનું આપના કરકમલમાં સમર્પિત કરતાં ધન્યતા અનુભવું છું.

**-ધર્મતિલક**

## શ્રી સ્મૃતિમંદિર પ્રકાશનના અમૂલ્ય પ્રકાશનો

| ક્રમ | નામ | વિષય | ભાષા |
|---|---|---|---|
| ૧ | ધોધ ધર્મદેશનાનો | સૂરિરામચન્દ્રના પ્રવચનાંશો | ગુ./ હિં. |
| ૨ | સાગર કાંઠે છબછબીયા | વીરશાસનના સૂરિપુંગવોની જીવન ઝાંખી | ગુ./હિં. |
| ૩ | જીવન જ્યોતના અજવાળા | પૂ.મુ. જયધ્વજ વિ.મ.સાની જીવનઝાંખી તથા એક વિરક્ત-મહાનુભાવની રોચક સત્યઘટના | ગુજ. |
| ૪ | સૂરિરામની ઢળતી સાંજ | સૂરિરામની અંતિમમહિનાની કલાકે કલાકની અવ્વલ ઘટનાઓ | ગુજ. |
| ૫ | સાધના અને સાધક | સૂરિમંત્રના અજોડ સાધક પૂ. આ. શ્રી વિજય શ્રેયાંસપ્રભસરીશ્વરજી મહારાજાની સંયમની ઝાંખી (સચિત્ર) | ગુજ. |
| ૬ | યોગદૃષ્ટિ સજ્ઝાય સાર્થ | પૂ. ઉપા. શ્રી યશોવિજય મ. રચિત સજ્ઝાય | ગુજ. |
| ૭ | અર્હદ્ અભિષેક પૂજન વિધિ | પ્રાચીન પૂજન દ્વારા પ્રભુ ભક્તિ | ગુજ. |
| ૮ | સુપાત્રદાન મહિમા + વિધિ | પૂ.સાધૂ સાધ્વીજી મ.ની ભક્તિ સંબંધી માહિતી | ગુજ. |
| ૯ | વાણીવર્ષાના અમૃતબિંદુ | પૂજ્યપાદ પ્રસિદ્ધપ્રવચનકાર શ્રીના પ્રવચનાંશો | ગુજ. |
| | | **સૂરિમંત્ર સમારાધક સંસ્કૃત-પ્રાકૃત ગ્રંથ શ્રેણી** | |
| ૧ | શ્રી શૃંગાર વૈરાગ્ય તરંગિણી (P) | વૈરાગ્યપ્રેરક પ્રાચીનગ્રંથ સટીક. | સં. |
| ૨ | ઉત્તરાધ્યયનસૂત્ર કથા સંગ્રહ (P) | શ્રી ઉત્તરાધ્યયન આગમમાં આવતી કથાઓનો સંગ્રહ | સં. |

| ક્રમ | નામ | વિષય | ભાષા |
|---|---|---|---|
| ૩ | ગૌતમ પૃચ્છા + ગૌતમાષ્ટક (P) | પ્રભુને શ્રી ગૌતમસ્વામીએ પૂછેલા પ્રશ્નો કથાસહિત | સં. પ્રા. |
| ૪ | રૂપસેનરાજકુમાર કુર્માપુત્ર ચરિત્ર (P) | ગદ્યબદ્ધ રોચક પ્રાચીન કથા | સં. |
| ૫ | જયાનંદ કેવલી ચરિત્ર, ગદ્ય (P) | અદભૂત રોચક ચરિત્ર રી'પ્રિન્ટ | સં. |
| ૬ | જિતકલ્પ- કલ્પવ્યવહાર નિશીથસૂત્રાણિ ચ. | પ્રાચીન આલોચના ગ્રંથનું રી'પ્રિન્ટ | પ્રા. |
| ૭ | પંચ સ્તોત્રાણિ | પ્રાચની પાંચસ્તોત્રો સટીક | સં. |
| ૮ | સુષઢચરિત્ર સાર્થ | આલોચનાવિષયક પ્રાચીન રોચકકથા | સં. ગુજ. |
| ૯ | સમવસરણ સાહિત્ય સંગ્રહ સાર્થ | દેશના ભૂમિ- સમવસરણનો વિસ્તૃત પરિચય | સં.પ્રા.ગુ. |
| ૧૦ | ઉપદેશ પ્રદીપ, પદ્ય | અઢાર પાપ. ક્રોધાદિ કષાયો ઈત્યાદિ ઉપર ઉપદેશ | સં. |
| ૧૧ | નવતત્ત્વ સંવેદન પ્રકરણ સટીક | નવતત્ત્વ સંબંધી સંવેદન દર્શક ગ્રંથ | સં. |
| ૧૨ | ગૌતમકુલક વૃત્તિ | ઔપદેશિક કથા ગ્રંથ | સં.પ્રા. |
| ૧૩ | પ્રશ્નપદ્ધતિ સાનુવાદ | સૌથી પ્રાચીન પ્રશ્નોત્તર ગ્રંથ | સં.ગુ. |
| ૧૪ | રત્નપાળનૃપતિ ચરિત્ર, પદ્ય | શીલવ્રત ઉપર રોમાંચક કથા | સં. |

(P) = પ્રતો સમજવી.

# પ્રકાશિત પુસ્તકોની નામાવલિ

॥ નમો નમોઃશ્રી ગુરુરામચન્દ્રસૂરયે ॥

કલિકાલના ધન્ના અણગાર સચ્ચારિત્રપાત્ર સ્વ. પૂજ્યપાદ પંન્યાસ-પ્રવરશ્રી **કાંતિવિજયજી**ગણિવરના સુવિનીત પટ્ટધરરત્ન વાત્સલ્ય-વારિધિ વર્ધમાનતપોનિધિ પૂજ્યપાદ આચાર્ય દેવેશશ્રીમદ્ **વિજય નરચન્દ્રસૂરીશ્વરજી** મ.સા.ના ૫૦ વર્ષીય નિર્મળ સંયમજીવનની અનુમોદનાર્થે પ્રકાશિત સાહિત્યની રૂપરેખા

| | **ગ્રન્થનું નામ** | **પ્રકાશક** |
|---|---|---|
| (૧) | શ્રીપુહઈચંદચરિયં | પ્રાકૃતટેક્ષ સોસાયટી |
| (૨) | શ્રી ચઉપ્પન્નમહાપુરુસચરિયં | પ્રાકૃતટેક્ષ સોસાયટી |
| (૩) | શ્રી સૂયગડાંગ સૂત્ર ચૂર્ણિ ભા-૧ | પ્રાકૃતટેક્ષ સોસાયટી |
| (૪) | શ્રી નંદિસૂત્ર વૃત્તિ | પ્રાકૃતટેક્ષ સોસાયટી |
| (૫) | શ્રી જયાનંદ કેવલી ચરિત્ર ગદ્ય(પ્રત) | સ્મૃતિમંદિર પ્રકાશન |
| (૬) | શ્રી સમવસરણ સાહિત્ય સંગ્રહ | સ્મૃતિમંદિર પ્રકાશન |
| (૭) | શ્રી નવતત્ત્વ સંવેદન પ્રકરણ | સ્મૃતિમંદિર પ્રકાશન |
| (૮) | શ્રી ઉપદેશ પ્રદીપ | સ્મૃતિમંદિર પ્રકાશન |
| (૯) | શ્રી સુપાત્રદાન મહિમા+વિધિ | સ્મૃતિમંદિર પ્રકાશન |
| (૧૦) | શ્રી રત્નપાલનૃપચરિત્ર પદ્ય | સ્મૃતિમંદિર પ્રકાશન |
| (૧૧) | શ્રી પ્રશ્નપદ્ધતિ સાનુવાદ | સ્મૃતિમંદિર પ્રકાશન |
| (૧૨) | શ્રી ગૌતમકુલક વૃત્તિ | સ્મૃતિમંદિર પ્રકાશન |
| (૧૩) | નામકર્મ | પં. શ્રીહરેશભાઈ એલ. કુબડીયા. |

# बृहद् विषयानुक्रमः


| विषयः | | श्लोकाङ्कः |
|---|---|---|
| | **परिच्छदः प्रथमः १-६०** | |
| १. | मङ्गलाचरणादि | १-४ |
| २. | दानादीनां विवादे दानस्य कथनम् | ५-१० |
| ३. | शीलस्य कथनम् | ११-१७ |
| ४. | तपसः कथनम् | १८-२५ |
| ५. | भावस्य कथनम् | २६-३३ |
| ६. | सर्वज्ञेन कृतः विवादनिर्णयः | ३४-४४ |
| ७. | दानस्य माहात्म्यम् | ४५-५९ |
| | **परिच्छेदो द्वितीयः ६०-३४४** | |
| ८. | चरित्रारम्भः नगरादिवर्णनम् | ६०-६५ |
| ९. | रत्नपालस्य स्वयंवरावसरे गमनम् | ६६-६७ |
| १०. | शृङ्गारसुन्दर्याः पुरः प्रतीहारेण कृतं राज्ञां वर्णनम् | ६८-८३ |
| ११. | रत्नपाले वरमालारोपणम् | ८४-८८ |
| १२. | अन्यराज्ञां कोपः | ८९-९४ |
| १३. | वीरसेनराज्ञा दत्ता हितशिक्षा | ९५-९८ |
| १४. | युद्धारम्भः | ९९-१०२ |
| १५. | युद्धनिवर्तनाय शृङ्गारसुन्दर्या कृता युक्तिः रत्नपालेन सह काष्ठभक्षणम् | १०३-११९ |
| १६. | पुनरागमनं लग्नोत्सवश्च | १२०-१४० |
| १७. | रत्नपालस्य स्वपुरे गमनम् | १४१-१४४ |
| १८. | राज्ये स्थापनं पितृदत्ता हितशिक्षा | १४५-१५० |
| १९. | जयामात्येन दत्ता विपत्तिः | १५१-१६१ |
| २०. | जयामात्येन कृता शृङ्गारसुन्दर्याः कदर्थना | १६२-१६९ |
| २१. | जयामात्यस्य वयस्येन दत्ता हितशिक्षा | १६९-१७४ |

| | विषयः | श्लोकाङ्कः |
|---|---|---|
| २२. | सतीशक्त्युपरि धनश्रीकथा | १७५-१९४ |
| २३. | शृङ्गारसुन्दर्या अवस्था | १९५-२०१ |
| २४. | अटव्यां रत्नपालस्य चिन्तनम् | २०२-२१५ |
| २५. | रत्नपालेन कृतो हेमाङ्गदस्योपकारः | २१६-२३० |
| २६. | वैदेशिकश्राद्धस्य शुश्रुषा | २३१-२३३ |
| २७. | रत्नवत्याः विषापनयनम् तया सह परिणयनम् | २३३-२४५ |
| २८. | स्वराज्यग्रहणाय गमनम् | २४६-२६५ |
| २९. | जयराजेन सह युद्धम्, देवकृतं आपदपनयनम् | २६६-२७७ |
| ३०. | पत्रवल्ली मोहवल्ली नाम्न्योः कन्ययोः पाणिग्रहणम् | २७८-३१७ |
| ३१. | सौभाग्यमञ्जर्या सह परिणयनम् | ३१८-३३१ |
| ३२. | विद्याधराणां स्वामित्वं स्वनगरे पुनरागमनम् | ३३२-३४४ |


**परिच्छेदस्तृतीयः ३४५-५६४**


| | | |
|---|---|---|
| ३३. | राज्यपालनम् | ३४५-३५२ |
| ३४. | द्यूतकारस्य वृत्तान्तः | ३५३-३८० |
| ३५. | देवसेनागन्धर्वसेनयोः पाणिग्रहणम् | ३८१-३९५ |
| ३६. | न्यायार्जितधनेन द्यूतकारस्योन्नतिः | ३९६-३९७ |
| ३७. | कनकमञ्जरीगुणमञ्जरीभ्यां सह विवाहः राज्यप्राप्तिश्च | ३९८-४३१ |
| ३८. | रत्नपालविरहे मूलराज्यरक्षणाय मन्त्रिभिः कृता युक्तिः | ४३३-४३८ |
| ३९. | पुनः मूलराज्ये आगमनम् | ४३९-४४३ |
| ४०. | रत्नपालऋद्धिवर्णनम् | ४४२-४५२ |
| ४१. | महासेनमुनि-आगमनम् | ४५४-४५७ |
| ४२. | धर्मदेशना | ४५८-५५८ |
| ४३. | सुलक्षणावृत्तान्तः | ४७३-५५७ |
| ४४. | राज्ञः मुनेः पूर्वभवपृच्छा | ५५८-५६९ |

| विषयः | | श्लोकाङ्कः |
|---|---|---|

**परिच्छेदश्चतुर्थः ५७०-८७५**


| | | |
|---|---|---|
| ४५. | सिद्धदत्त-धनदत्तयोः देव्याराधनम् | ५७०-५७६ |
| ४६. | देव्या वरदानम् | ५७७-५८० |
| ४७. | वरप्रभावात् सिद्धदत्तस्य धनप्राप्तिः | ५८१-५९१ |
| ४८. | सिद्धदत्तस्य लोभः | ५९२-५९७ |
| ४९. | विमलस्य हितशिक्षा | ५९८-६१० |
| ५०. | शृङ्गदत्तवृत्तान्तः | ६११-६७५ |
| ५१. | सिद्धदत्तस्य परदेशगमनम् | ६७६-६७८ |
| ५२. | पुनरागमने विपत्तिः | ६७९-६८३ |
| ५३. | शून्यद्वीपप्राप्तिः | ६८४-६९३ |
| ५४. | नृपस्याज्ञा-पुनर्मोचनम् | ६९४-६९८ |
| ५५. | सिद्धदत्तस्य निर्विवेकत्वात् धनगर्वः | ६९९-७०२ |
| ५६. | धनदत्तस्य सविवेकत्वात् कुशलानुष्ठानम् | ७०३-७०९ |
| ५७. | धनदत्तस्य धनप्राप्तिः | ७१०-७२३ |
| ५८. | धनदत्तेन भाग्यपरीक्षणम् | ७२४-७३६ |
| ५९. | भाग्यानुकुल्ये धनदत्तस्य व्यापारः बहुधनप्राप्तिः | ७३७-७४१ |
| ६०. | सिद्धदत्तस्य निर्विवेकत्वात् अनर्थः, सर्वधननाशः | ७४२-७७३ |
| ६१. | सिद्धदत्तस्य मानसिकव्यथा तापसत्वस्वीकारः | ७७४-७८० |
| ६२. | धनदत्तस्य यशः | ७८१-७८८ |
| ६३. | धनदत्तेन धूर्तस्य प्रत्युत्तरदानम् | ७८९-७९९ |
| ६४. | धनदत्तेन कृतः गणिका-धूर्तयोर्विवादनिर्णयः | ८००-८१९ |
| ६५. | रक्षःकृतोपद्रवशमनम् | ८२०-८२७ |
| ६६. | नृपेण कृतं मुनिदानम् | ८२८-८३६ |
| ६७. | पूर्वभव-वर्तमानभवानुसन्धानम् | ८३७-८५१ |
| ६८. | रत्नपालनृपस्य वैराग्यम् | ८५२-८६४ |
| ६९. | दीक्षाग्रहणादि | ८६५-८७३ |
| ७०. | प्रशस्तिः | ८७४-८७८ |


■ ■ ■

॥ अर्हम् ॥

॥ परमगुरुश्रीमद्विजयरामचन्द्रसूरिपादपद्मेभ्यो नमः ॥

श्रीमद्वाचनाचार्यसोमंमण्डनमणिविरचितं

# ॥ श्रीरत्नपालनृपकथानकम् ॥

## परिच्छेदः प्रथमः

श्रेयः श्रीसद्मने तस्मै, नमः श्रीनाभिजन्मने ।
यन्नामापि नृणां दत्ते, कल्पशाखीव कामितम् ॥ १ ॥

दानं शीलं तपो भावश्चेति धर्मश्चतुर्विधः ।
श्रियां हेतुर्भवाम्भोधि-सेतुः केतुर्[1]महापदाम् ॥ २ ॥

तत्र जानीत चोत्कृष्टं, दानं यत्प्राग्जिनैरपि ।
दानाद्यन्योन्यवादोक्ति-युक्त्या तद्वदितं गुरु ॥ ३ ॥

तथाहि—

दानशीलतपोभावा, मुक्तिमार्गस्ततोऽन्यदा ।
मिथस्ते विवदन्ते स्म, स्वस्वमाहात्म्यगर्विताः ॥ ४ ॥

दानमूचेऽहमेवाऽस्मि, मुक्तेर्मुख्यं निबन्धनम् ।
सहकारि तु तत्राऽन्यत्सर्वं शीलादि बुध्यताम् ॥ ५ ॥

मयैवाऽऽरोपितं( तः ) प्रौढिमियतीमेकजन्मना ।
शिवं गमी शालिभद्रो, जानात्येतज्जगत्त्रयम् ॥ ६ ॥

---

१. अत्र केतु शब्देनापदां नाशकत्वं सूचितम् ।

यद्दत्तमाज्यं साधुभ्यो, धनसार्थेशजन्मनि ।
तेनाऽभूच्छ्रीयुगादीशः, स त्रैलोक्यपितामहः ॥ ७॥

पाणेरिक्षुरसं[१] दातुः, प्रपौत्रस्यापि यत्प्रभुः ।
अधः पाणिमधान्नूनं, तन्माहात्म्यं मम स्फुटम् ॥ ८॥

ये न कस्यापि साहाय्यमीहन्ते कर्मणि क्वचित् ।
दातारं तेऽप्यपेक्षन्ते, प्रवृत्ता मुक्तिवर्त्मनि ॥ ९॥

किं बहुना ।

निधयो नव यत्पुंसः, सिद्धयोऽष्टौ च सद्मनि ।
यच्चाऽन्यदपि सद्भोगारोग्याद्यं तत्फलं हि मे ॥ १०॥

शीलं तदाख्यत्सोत्कर्षं, मोक्षाङ्गेष्वत्र मुख्यता ।
ममैव युक्त्या घटते, न त्वन्येषां कथञ्चन ॥ ११॥

इहोद्भूताद्भुतप्रातिहार्यो यत्प्राप निर्वृतिम् ।
श्रेष्ठी सुदर्शनस्तत्र, हेतुः कोऽपि न मत्परः ॥ १२॥

सत्यः सीतासुभद्राद्याः, साधयन्ति स्म यत्पुरा ।
तत्तद्दुःसाधकृत्यानि,तन्माहात्म्यं हि मेऽनघम् ॥ १३॥

स्वेच्छाचार्यपि सावद्यनिरतः कलिकौतुकी ।
मामाराध्य मनःशुद्ध्या, नारदो मोक्षमाप्नुयात्[२] ॥ १४॥

अन्यैरप्युक्तम्—

*"[३]कलिकारओऽवि जणमारओऽवि सावज्जजोगनिरओऽवि ।*
*जं नारओऽवि सिज्झइ, तं खलु सीलस्स माहप्पं" ॥ 1॥*

---

१. 'दातुः' इति तृना योगे षष्ठ्यभावः। २. आप्तवान् इति भवेत्।

३. कलिकारकोऽपि जनमारकोऽपि सावद्ययोगनरितोऽपि।
यन्नारदोऽपि सिद्ध्यति तत् खलु शीलस्य माहात्म्यम्"॥ इति च्छायां ॥

नानुज्ञातं निषिद्धं वा,किञ्चिदन्यज्जिनैः क्वचित् ।
संसारबीजं त्वब्रह्म, सर्वत्रापि न्यषिध्यत ॥ १५॥

यदुक्तम्—

''[१]नवि किञ्चि अणुन्नायं, पडिसिद्धं वावि जिणवरिंदेहिं ।
मुत्तुं मेहुणभावं,न तं विणा रागदोसेहिं'' ॥ 2॥

जितेन्द्रियत्वं यत्तस्माद्विनयश्चेत्यतः क्रमात् ।
पुंसा स्युः सम्पदोऽपीत्थं, सम्पन्मूलमहं ध्रुवम् ॥ १६॥

''जितेन्द्रियत्वं विनयस्य कारणं, गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते, जनानुरागप्रभवा हि सम्पदः'' ॥3॥

तन्ममेत्याद्य[1]सम्भाव्याऽवदातविदितात्मनः ।
शतांशमपि नाऽर्हन्ति,धर्मा दानादयो ध्रुवम् ॥ १७॥

तपस्तदाख्यद्दानादेर्गुरुता तावदिष्यते ।
जगत्युज्जागरं यावन्मन्माहात्म्यं न वीक्ष्यते ॥ १८॥

दुःसाधकार्ये हरयश्चक्रिणश्च महौजसः ।
इष्टसिद्धिप्रतिभुवं मामेवोपासते सदा ॥ १९॥

यदुक्तम्—

''[२]अथिरंपि थिरं वंकंपि उज्जुअं दुल्लहंपि तह सुलहं ।
दुस्सज्झंपि सुसज्झं, तवेण सम्पज्जए कज्जं' ॥ 4॥

---

१. ''नापि किञ्चिदनुज्ञातं प्रतिषिद्धं वाऽपि जिनवरेन्द्रैः।
मुक्त्वा मैथुनभावं न तद्विना रागद्वेषाभ्याम् ॥'' इतिच्छाया

२. ''अस्थिरमपि स्थिरं वक्रमपि ऋजुकं दुर्लभमपि तथा सुलभम् ।
दुःसाधमपि सुसाधं तपसा संपद्यते कार्यम्॥''

1. 'તેથી, આ પ્રમાણે સંભવી પણ ન શકે એવા તેજથી ઓળખાયું છે સ્વરૂપ જેનું એવા મારા' એમ અર્થ કરવો.

भवैरनन्तैराचीर्णं, दुष्कर्मानन्तमप्यहम्।
क्षणेन भस्मसात्कुर्वे, वह्नी राशिमिवैधसाम्॥ २०॥

अन्यैरप्युक्तम्—

*"दीप्यमाने तपोवह्नौ, बाह्ये चाऽभ्यन्तरेऽपि च ।*
*यमी जरति कर्माणि, दुर्ज्जराण्यपि तत्क्षणात्" ॥ 5॥*

निकाचितेभ्यः कर्मभ्यो, द्विधैवात्मा हि मुच्यते ।
अनुभूय स्वयं तानि, कृत्वा वा भस्मसान्मया ॥ २१॥

यदुक्तं श्रीसीमन्धरस्वामिनापि—

*"पावाणं[१] च खलु भो कडाणं कम्माणं*
*पुव्विं दुच्चिण्णाणं दुप्पडिक्कन्ताणं वेइत्ता मुक्खो,*
*नत्थि अवेइत्ता तवसा वा झोसइत्ता" इत्यादि ॥ ( दश. प्र. चूलिका )*

निषिद्धाचरणाद्युत्थैः, पापैरात्मा मलीमसः ।
सम्यग्गुरूपदिष्टेन, मयैवाशु विशुध्यति ॥ २२॥

ब्रह्मस्त्रीभ्रूणगोघातपातकैर्नरकातिथिः ।
दृढप्रहारी शरणं, प्राप्तो नीतः शिवं मया ॥ २३॥

प्रक्षीणसप्तकः साक्षाज्जिनमाराधयन्नपि ।
श्रेणिकः प्राप नरकं, विमुक्तः करतो मया ॥ २४॥

अन्वयव्यतिरेकाभ्यां, दृष्टप्रत्ययमप्यहम् ।
दानशीलादिमाहात्म्यैः, कथं पश्चात्क्रिये बुधैः ॥ २५॥

दानादीन्यवदद्भावस्तदा गर्वेण मत्पुरः ।
किं न गर्ज्जन्ति[1] लज्जध्वे, मदाप्य[२] महिमश्रियम् ॥ २६॥

---

१. पापानां च खलु भोः कृतानां कर्मणां पूर्वं दुश्चीर्णानां दुष्प्रतिक्रान्तानां वेदयित्वा मोक्षो, नास्ति अवेदयित्वा तपसा वा क्षपयित्वा॥ इतिच्छाया

२. मत्तः ( आप्य लब्ध्वा )। 1. આ વર્તમાન કૃદન્ત છે.

यदुक्तम्—

"भरिऊण[1] जलं जलया, जस्स पभावेण उन्नइं पत्ता ।

तस्सेव पुणो उवरिं, गज्जन्ता किं न लज्जन्ति" ॥ 6॥

यथात्मानं विना कायो, यथा पुष्पं फलं विना ।

विनाम्भश्च सरो यूयं, तथा सर्वाणि मां विना ॥ २७॥

यदन्यत्राप्युक्तम्—

"घनं दत्तं वित्तं जिनवचनमभ्यस्तमखिलं,

क्रियाकाण्डं चण्डं रचितमवनौ सुप्तमसकृत् ।

तपस्तप्तं तीव्रं चरणमपि चीर्णं चिरतरं,

न चेच्चित्ते भावस्तुषवपनवत्सर्वमफलम्" ॥ 7॥

निबध्य निबिडैः पाशैर्मोहेन भवचारके ।

क्षिप्तोऽपि भरतश्चक्री, मयैवामोच्यत क्षणात् ॥ २८॥

मुख्यं मोक्षाङ्गमासाद्य, मामाद्यभगवत्प्रसूः ।

पूर्वमप्राप्तधर्मापि, क्षणान्मोक्षमुपेयुषी ॥ २९॥

आषाढभूतिः कपटी, भ्रष्टोऽपि ब्रह्मवर्त्मनः ।

प्रापितः परमब्रह्म, निरुध्यान्यगतीर्मया ॥ ३०॥

कर्मभिः कपिवद् वंशे, नर्त्त्यमानः स रागहृत् ।

प्रापेलातीसुतः सद्यो, मच्छुद्धया ज्ञानमुज्ज्वलम् ॥ ३१॥

मदीयाशुद्धिशुद्धिभ्यां, बन्धमुक्ती नृणां क्षणात् ।

अत्र प्रसन्नचन्द्रर्षिः, स्पष्टमिष्टो निदर्शनम् ॥ ३२॥

---

१. "भृत्वा जलं जलदा यस्य प्रभावेण उन्नतिं प्राप्ताः ।

तस्यैव पुनरुपरि गर्जन्तः किं न लज्जन्ते" ॥ इति च्छाया ।

विरताऽविरतभ्रातृद्वयवृत्तनिदर्शनात् ।
प्रामाण्यं मम सर्वत्र, क्रियायास्तु न हि क्वचित् ॥ ३३ ॥
इत्थं दानादयो धर्माः, स्वस्वमाहात्म्यगर्विताः ।
विवदन्तो मिथः प्रापुः, पार्श्वे तीर्थकृतः प्रभोः ॥ ३४ ॥
समानदृष्टिः सर्वत्र, वीतरागः स सर्ववित् ।
विवादं भङ्क्तुमिति तान्, स्वोपज्ञं न्यगदत्तदा ॥ ३५ ॥
सकृदेकैकपर्यायग्राहिणी वाग् नयः स्मृतः ।
प्रमा तु युगपन्नैकवस्तुधर्मावलम्बिनी ॥ ३६ ॥
नया ह्यन्योन्यसापेक्षाः, सर्वज्ञैः सुनया मताः ।
अन्योन्यमत्सरक्षीणविषया दुर्नयाः पुनः ॥ ३७ ॥
[१]*जोगे जोगे जिणसासणम्मि दुक्खक्खया पउज्जन्ते ।*
*इक्किक्कम्मि अणन्ता, वट्टन्ता केवली जाया ॥ 8 ॥*
इति प्रत्येकमप्यत्र, प्राप्य मोक्षाङ्गतां समे ।
मिथो मत्सरमालम्ब्याऽधुना मा भूत दुर्नयाः ॥ ३८ ॥
प्रायः सत्पात्रसश्रद्धदानाच्छीलाच्च निर्मलात् ।
नैकेऽपि तपसस्तीव्रात्सद्भावाच्च शिवं गताः ॥ ३९ ॥
न्यूनाधिकत्वं चान्योन्यमथ चेज्ज्ञातुमिष्यते ।
शृणुताऽवहितीभूय, तदपि ज्ञापयामि वः ॥ ४० ॥
शील! चन्द्रकरोन्मीलदतिनैर्मल्यलील! हे!।
निर्निदान! तपस्तीव्रभावने! चाघनाशिनि! ॥ ४१ ॥
एकस्यैव भवेन्मुक्तिर्युष्मदाराधनाद् ध्रुवम् ।
दानात्प्रदातुश्चादातुर्द्वयोः स्पष्टमिहेक्ष्यते ॥ ४२ ॥ युग्मम् ॥

---

१. "योगे योगे जिनशासने दुःखक्षयाय प्रयुज्यमाने ।
एकैकस्मिन् अनन्ता वर्तमानाः केवलिनो जाताः" ॥ इति च्छाया ।

*शास्त्रान्तरेऽप्युक्तम्—*

*"हे! शील ! चन्द्रकरलील ! भवाम्बुराशि-*
*निस्तारणोडुप! तपः! शृणु भावने ! त्वम् ।*
*एकस्य सिद्धिरभवद्भवतां प्रसादाद्,*
*दानात्तु दातुरपरस्य च मुक्तिमार्गः" ॥ 9 ॥*

अरक्तद्विष्टमनसः, सर्वज्ञस्य मुखाम्बुजात् ।
निशम्य सम्यगाधिक्यमिति दानस्य यौक्तिकम्[1] ॥ ४३ ॥

ह्रीणा मात्सर्यमुत्सृज्य, धर्माः शीलादयस्त्रयः ।
ततःस्म बहु मन्यन्ते, दानं न्यस्यात्मनो धुरि ॥ ४४ ॥ युग्म

संयोगारोग्यसद्भोगभाग्यसौभाग्यसम्पदाम् ।
दानं निदानं सर्वज्ञैरत्रामुत्र च वर्ण्यते ॥ ४५ ॥

इयर्त्ति स्फूर्त्तिमतुलां, कीर्त्तिर्दानेन सर्वतः ।
आस्ये प्रशस्या दीप्तिश्च, दानेनोदयिनी नृणाम् ॥ ४६ ॥

आसतां स्वजना दूरे, प्राच्यप्रेमवशीकृताः ।
दानेनावर्ज्जिता मूर्ध्ना, विद्विषोऽपि वहन्त्यपः ॥ ४७ ॥

भूतानि प्रतिकूलानि, निखिलान्यपि तत्क्षणात् ।
वशीभवन्ति दानेन, दूरितोत्सर्पिपाप्मना ॥ ४८ ॥

दुर्वारा दुरितव्राताः, प्रोद्भूताः प्राच्यकर्मभिः ।
प्रायः पुंसां प्रणश्यन्ति, दानप्रतिहतौजसः ॥ ४९ ॥

गुणानपेक्षं सर्वत्र, मुग्धैस्तद्देयमन्वहम् ।
क्वापि सत्पात्रमप्येवं, यन्मेलिष्यति कर्हिचित् ॥ ५० ॥

---

1. 'युक्तिथी घटी शके तेवुं'

यदुक्तम्—

*"सर्वत्र ददतो दातुः, पात्रयोगोऽपि सम्भवेत्।*
*वर्षन् क्षारार्णवेऽप्यब्दो, मुक्तात्मा क्वापि जायते" ॥ 10॥*

शुद्धं सकृदपि प्रत्तं[1], सत्पात्रे श्रद्धया ध्रुवम् ।
कल्पतेऽनल्पलाभाय, स्वल्पमप्यचिरान्नृणाम् ॥ ५१ ॥

यदुक्तम्—

*"व्याजे स्याद् द्विगुणं वित्तं, व्यवसाये चतुर्गुणम् ।*
*कृषौ शतगुणं प्रोक्तं, पात्रेऽनन्तगुणं पुनः" ॥ 11॥*

इतिहासेऽप्युक्तम्—

*"बह्वप्यश्रद्धया दत्तं, नष्टमाहुर्मनीषिणः ।*
*वार्यपि श्रद्धया दत्तमानन्त्यायोपकल्पते" ॥ 12॥*

तत्त्वार्थिभिः पुनः सम्यक्, पात्रापात्रविवेचकैः ।
निश्चित्यैव गुणैः पात्रं, श्रद्धादानं विधीयते ॥ ५२ ॥

दत्ते पुनः कुपात्रेभ्यः, श्रद्धादाने विवेकिभिः ।
तदीयदुश्चरित्राणां, कृतं स्यादुपबृंहणम् ॥ ५३ ॥

देयं सर्वत्र दीनादौ, दयादानं तु तैरपि ।
सार्वैर्निषिद्धं यत्सर्वजनीनैस्तन्नहि क्वचित् ॥ ५४ ॥

रुच्यैः कृषिर्यथोत्कृष्टा, क्षेत्रबीजाम्बुदाऽनिलैः ।
विफला मध्यमा वा स्याद्, व्यपायेऽन्यतरस्य तु ॥ ५५ ॥

दानं तथोत्तमं पात्रवित्तभावानुमोदनैः ।
विफलं मध्यमं वा स्याद्, व्यपायेऽन्यतरस्य तु ॥ ५६ ॥

श्रद्धया निहितं दानं, सत्पात्रे समये नृभिः ।
शुक्तौ स्वाताविवाऽब्देन, वारि स्यान्मौक्तिकश्रिये ॥ ५७ ॥

---

१. प्रदत्तम् ।

महर्घ्याण्यासतां खाद्याऽशनस्वाद्यानि सर्वथा ।
सत्पात्रे समये दत्तमम्भोऽपीष्टार्थसिद्धये ॥ ५८॥
तृषार्त्तेषु यथा भीष्मग्रीष्मर्त्तौ शुद्धसाधुषु ।
दत्तं नीरमभूद्रत्नपालस्याऽद्भुतसम्पदे ॥ ५९॥

## परिच्छेदो द्वितीयः

तथाहि-अस्तीह भरतक्षेत्रे, पुरं पाडलिपुत्रकम् ।
पुरुहूतपुरस्पर्द्धि, समृद्धि[1]सुषमास्पदम् ॥ ६०॥
[2]हित्वा सहानवस्थानविरोधं प्रथितं मिथः ।
यत्र लक्ष्मीसरस्वत्यौ, प्रीत्या पौरेषु खेलतः ॥ ६१॥
पश्यन् स्निग्धदृशा सर्वा, निजापत्यमिव प्रजाः ।
षण्णवत्या नृपगुणैरर्ज्जितोर्ज्जितसद्यशाः ॥ ६२॥
प्रतापतपनस्तत्र, त्रासिताऽखिलशात्रवः ।
भूपालो विनयात्पालः, समभूद्भूरिविक्रमः ॥ ६३॥ युग्मम् ॥
माररूपः कुमारोऽस्य, कुमा[१]रातुलविक्रमः ।
रत्नपालः कुलव्योमोद्द्योतप्रद्योतनोऽभवत् ॥ ६४॥
द्वासप्ततिकलाशाली, कामकेलिवनं क्रमात् ।
यौवनं युवतिप्रीतिजननं भजति स्म सः ॥ ६५॥
वीरसेनस्य भूभर्त्तुः, पुरे हंसपुरेऽन्यदा ।
पुत्र्याः शृङ्गारसुन्दर्याः, स्वयंवरणमण्डपे ॥ ६६॥
रूपसौभाग्यभाग्याद्यैर्गुणैः सर्वत्र विश्रुतः ।
ससैन्यः पितुरादेशाद्दूताहूतो जगाम सः ॥ ६७॥ युग्मम् ॥

---

1. 'સમૃદ્ધિને કારણે સુષમ(બીજો આરો) નું સ્થાન 2. એકબીજાના સાથે નહી રહેવા સ્વરૂપ વિરોધને તજીને.. १. कुमारः कार्तिकेयः ।

अन्येऽपि भूभुजस्तत्र, महोत्साहा महौजसः ।
स्वस्वसैन्यैः सहाऽजग्मुर्दूताऽऽहूताः सहस्त्रशः ॥ ६८ ॥

शुभेऽह्नि सदलङ्कारा:, सर्वर्ध्या सपरिच्छदाः ।
निषेदिवांसस्तत्रैत्य, मञ्चोन्मञ्चेषु ते पुनः ॥ ६९ ॥

चतुःषष्टिकलादक्षा, शुभसर्वाङ्गलक्षणा ।
स्वयंवरस्त्रजं पाणौ, बिभ्रती स्वसखीवृता ॥ ७० ॥

सा तत्राऽद्भुतशृङ्गारं, कृत्वा शृङ्गारसुन्दरी ।
आगमत् त्रिजगज्जैत्री, शक्तिर्मूर्त्तेव मान्मथी ॥ ७१ ॥ युग्मम् ॥

अथ तस्याः पुरोभूय, प्रतीहारः पटिष्ठवाग् ।
प्रत्येकं तान् नृपानूचे, नामवंशादिकीर्त्तनैः ॥ ७२ ॥

तथाहि—

अयं काशीश्वरः सुभ्रु !, सूरसेनः पराक्रमी ।
त्रिस्रोतःस्रोतसि[1] स्वैरं, यः खेलति मरालवत् ॥ ७३ ॥

श्रूयन्ते काशिवास्तव्या, वञ्चनाचञ्चवो नराः ।
इत्युक्तिमात्रात्काशीशे, सा विरागमसूचयत् ॥ ७४ ॥

बलिष्ठोऽयं मधूपघ्नपतिर्मधुरवाग्मधुः ।
एतं(नं) वृणीष्वेत्यवदत्प्रतीहारोऽथ तां पुनः ॥ ७५ ॥

कालियाहेरिव विषैर्विनीलं यामुनं जलम् ।
वृन्दावनं च यत्क्रीडास्थानं तस्योच्यतेऽथ किम् ॥ ७६ ॥

उपहासगिरेत्यस्मिन्, ज्ञातेऽथाऽरुचिते पुनः ।
प्रतीहारः कङ्कुणानामित्यधीशमवर्णयत् ॥ ७७ ॥

---

१. गङ्गापूरे ।

बलोऽयं बलवत्सीमा, यद्भिया किल जम्भजित् ।
छिनत्त्यद्यापि नाऽम्भोधि-निलीनाऽचलपक्षती: ॥ ७८ ॥
साऽप्याऽऽख्यदिति तत्रत्या, नरा निष्कारणक्रुधः ।
शक्नोमि तदमुं रुष्टं, नानुनेतुं पदे पदे ॥ ७९ ॥
यदुक्तम्—
*"अकाण्डकोपिनो भर्त्तुरन्यासक्तेश्च योषितः ।*
*प्रसत्तिश्चेतसः कर्त्तुं, शक्रेणाऽपि न शक्यते" ॥ 13 ॥*
प्रतीहारोऽथ दोःस्थामधामधैर्यादिभिर्गुणैः ।
गौडमालवकाद्यष्टदेशाधीशानवर्णयत् ॥ ८० ॥
गौडाः कार्यविचक्षणा बहुभुजो दुष्टा नरा मालवा-
ष्टक्कस्वार्थपराः खसा जडधियो धूर्त्ता महाराष्ट्रजाः ।
लाटाः केवलवाक्प्रपञ्चचतुराः क्रूराश्च कर्णाटजा,
अन्तर्गूढनिबद्धवैरहृदयाः प्रायो नरा गौर्जराः ॥ ८१ ॥
तानपीत्यखिलान् सर्वगुणोपेतवरार्थिनी ।
देशसामान्यदोषोक्त्या, प्रत्युत्तरयति स्म सा ॥ ८२ ॥
एवं यं यं व्यतीयाय, क्ष्मापालं सा पतिंवरा ।
राहुग्रस्तेन्दुवच्छ्यामं, तस्य तस्याऽभवन्मुखम् ॥ ८३ ॥
यदुक्तम्—
*"[१]सञ्चारिणी दीपशिखेव रात्रौ, यं यं व्यतीयाय पतिंवरा सा ।*
*नरेन्द्रमार्गाट्ट इव प्रपेदे, विवर्णभावं स स भूमिपालः" ॥ 14 ॥*
अथेत्याख्यत्प्रतीहारः, पश्यन्नेत्राऽमृताञ्जनम् ।
रत्नपालः कुमारोऽयं, कुमार इव विक्रमी ॥ ८४ ॥
सूनुर्विनयपालाह्वक्ष्मापालस्य परन्तपः ।
वृत्वा तदेनं सुभगं, जनुःसाफल्यमाप्नुहि ॥ ८५ ॥

---

१. रघुवंशस्थषष्ठ सर्गगोऽयं श्लोकः; एतद् रचनावैचित्र्येणैव दीपशिखाकालिदास इति कालिदासस्य प्रसिद्धिः।

तं कुमारं तदा वीक्ष्य, सा स्मेराक्षी स्मरोपमम् ।
मयूरीवोन्नतं मेघमतीव मुमुदे हृदि ॥ ८६॥

नृपान्तरेषु भ्रमणाद्भृशं श्रान्तिमुपेयुषी ।
तस्मिन्सर्वगुणावासे, तस्या विश्राम्यति स्म दृग् ॥ ८७॥

सर्वराजेषु पश्यत्सु, वरमालामथाऽक्षिपत् ।
सा कण्ठे रत्नपालस्य, स्नेहेन प्राच्यजन्मनः ॥ ८८॥

पश्यतामियतां नोऽद्य, कुलशीलादिशालिनाम् ।
बालस्तन्या विलासोऽयं, चेत्कनीं परिणेष्यते ॥ ८९॥

भावी नस्तज्जलोत्तारो, ध्यात्वेत्यन्ये नृपास्तदा ।
एकीबभूवुः सख्यं हि, समाने व्यसने भवेत् ॥ ९०॥

अथ तान् विकृतान्वीक्ष्य, वीरसेनः समं बलैः ।
एत्य जामातृरक्षायै, सर्वतोऽवहितः स्थितः ॥ ९१॥

तदेवोत्सर्पिमात्सर्या, निर्विचारहृदश्च ते ।
वीरसेनं विचारज्ञमित्याख्यन्नेकतः स्थिताः ॥ ९२॥

दद्या यदृच्छया राजन्नस्मादाच्छिद्य कस्यचित् ।
अस्मास्वन्यतरस्यैतां, गुणरत्नावनीं कनीम् ॥ ९३॥

मणिमालामिवानर्हां, बालां शृङ्गारसुन्दरीम् ।
रासभस्य न बालस्यामुष्य मृष्यामहे परम् ॥ ९४॥

वीरसेनस्तदेत्याख्यात्, प्रौढैरेव मनोरथैः ।
आयान्ति भूरिशो भूपाः, स्वयंवरणमण्डपे ॥ ९५॥

एक एवोद्वहेत्तेषु, प्राच्यपुण्येरितः कनीम् ।
अरुष्टाऽतुष्टमनसो, यान्त्यन्ये च यथागतम् ॥ ९६॥

व्यवहारममुं सर्वसिद्धं ज्ञातवतां हि वः ।
रोषतोषौ न युज्येते, भाग्याधीनेऽत्र कर्मणि ॥ ९७॥

यदुक्तम्—

*"अर्वाग्दृष्टितया लोको, यथेच्छं वाञ्छते प्रियम् ।*
*भाग्यापेक्षी विधिर्दत्ते, तेन चिन्तितमन्यथा" ॥ 15 ॥*

इत्याख्यद्व्रतपालश्च, मयि कन्यावृतेऽद्य वः ।
मन्युर्न युज्यते किन्तु, दैवे दौर्भाग्यदायिनि ॥ ९८ ॥

विशिष्य विस्फुरत्कोपाटोपाः सर्वे नृपास्तदा ।
सद्यः सज्जीबभूवुस्ते,तं निहन्तुं क्रनीवरम् ॥ ९९ ॥

अथैवं व्यमृशच्चित्ते, वीरसेनो विषादभाग् ।
शान्तिकं कुर्वतां जाने, हा! वेतालोऽयमुत्थितः ॥ १०० ॥

हर्षस्थाने विषादो वा, क्षुतं वा भोजनक्षणे ।
मङ्गल्यपर्वण्येतस्मिन्, यद्रौद्रोऽयं रणागमः ॥ १०१ ॥ युग्मम् ॥

इयं क्रनी कुनक्षत्रा, कालरात्रिरिवाऽधुना ।
संहर्त्तुं सुभटश्रेणीरवतीर्णा भुवि ध्रुवम् ॥ १०२ ॥

तदेत्य कालप्रलयं, तत्र वीक्ष्य स्वहेतुकम् ।
प्राच्यं स्वकर्म निन्दन्ती, सा प्रत्युत्पन्नधीः कनी ॥ १०३ ॥

किञ्चिद्विमृश्य स्वगतं, कथयित्वा च तद्रहः ।
चतुर्बुद्धिनिधानाय, सचिवाय सुबुद्धये ॥ १०४ ॥

निवर्तयन्ती तुमुलं, हस्तमुत्क्षिप्य दूरतः ।
अवोचत्स्पष्टवाचैवं, संरब्धान् सर्वभूभुजः ॥ १०५ ॥ ( त्रिभिर्विशेषकम् )

खननीयो गिरिर्भूपाः, कर्षणीयश्च मूषकः ।
तद्वदीदृग् रणारम्भो, मदर्थं युज्यते न वः ॥ १०६ ॥

कुर्वते हा ! हठारूढाः, परतेजोऽसहिष्णवः ।
वचोमात्रकृते शूरा, राष्ट्रकोशबलक्षयम् ॥ १०७॥
तथापि कलहं हित्वा, सत्त्वाढ्यः स मया समम् ।
काष्ठानि भक्षयत्वेत्य, यो मां परिणिनीषति ॥ १०८॥
तस्या वाचमिति श्रुत्वा, निवृत्ताः समरोद्यमात् ।
अन्योऽन्यं व्यमृशन्नेवं, विस्मितास्ते महीभुजः ॥ १०९॥
कोऽप्युपैति मृतो जातु, न महत्यपि पर्वणि ।
जीवन्निह पुमान् शस्तशतान्याप्नोति च क्रमात् ॥ ११०॥
सुखानि सर्वाङ्गीणानि, पुण्यैरद्यात्र सन्ति नः ।
स्त्रीमात्रार्थे मृतौ चात्महानिर्हास्यं जनेषु च ॥ १११॥
तन्नात्र मृत्या नः कार्यं द्रक्ष्यतेऽद्यात्मभिः परम् ।
कन्यार्थं म्रियमाणोऽयं, बालः कालकटाक्षितः ॥ ११२॥
ज्ञापयित्वाऽथ सङ्केतं, रत्नपालाय सा धिया ।
कृतौपवस्ता[1] त्रिदिनीं, न्यवसत्सरितस्तटे ॥ ११३॥
तावत्स्थूलतरैः काष्ठैर्विरचय्य महाचिताम् ।
तत्राऽधोऽचीखनन्मन्त्री, सुरङ्गां स्वनरै रहः ॥ ११४॥
स्नात्वा दत्वाऽथ दीनेभ्यस्तेषु पश्यत्सु राजसु ।
सा कनी रत्नपालश्च, चितामविशतामुभौ ॥ ११५॥
हाहाकारं च कुर्वत्सु, पौरलोकेषु सर्वतः ।
ज्वालितो ज्वलनस्तत्र, पार्श्वस्थै राजपुरुषैः ॥ ११६॥
तेन नष्टाऽध्वना तावच्चितातस्तौ कनीवरौ ।
निर्गत्य द्वारमावृत्य, रहः प्राप्तौ नृपौकसि ॥ ११७॥

१. कृतोपवासा।

प्रज्वलय्य चितां प्राप, वीरसेनोऽथ सद्मनि ।
विषादविस्मयापन्नाः, पौराश्चागुः स्ववेश्मसु ॥ ११८॥
अस्मद्धठादियं बाला, बालश्चायं मृतावुभौ ।
इति सानुशयाश्चाऽन्ये[1], नृपाः स्वस्वपुरं ययुः ॥ ११९॥
अथ प्रेष्य द्वितीयेऽह्नि, रहस्तत्र नदीतटे ।
साराऽलङ्कारनेपथ्यौ, कुमारश्च कनी च तौ ॥ १२०॥
रोदसी बधिरीकुर्वन्, विविधातोद्यनिःस्वनैः ।
सम्मुखं सपरीवारस्तत्र गत्वा स भूपतिः ॥ १२१॥
पट्टहस्तिनमारोप्य, हर्षोत्कर्षोल्लसन्मनाः ।
धृतच्छत्रावुभयतो वीज्यमानौ च चामरैः ॥ १२२॥
यथेच्छदानैरनृणीकुर्वाणः सर्वतोऽवनीम् ।
प्रावेशयत्पुरस्याऽन्तर्महैर्विश्वातिशायिभिः ॥१२३॥( चतुर्भिः कलापकम् )
सदस्याऽश्रावयन् सोऽथ, सदस्यास्तः ससंभ्रमम् ।
तमप्राक्षीन्निजोत्सङ्गे, निवेश्यं नृपनन्दनम् ॥ १२४॥
कथं वत्स ! युवां वह्निप्रविष्टावपि जीवितौ ।
दिव्यालङ्कारनेपथ्यावाप्तिरेषा कुतश्च वाम् ॥ १२५॥
तदा सोऽपीत्यवग्[2] राजन् !, शीलसत्त्वादिशालिनः ।
दाहात्माऽपि दहेदग्निर्देहिनो न हि कर्हिचित् ॥ १२६॥
निःसमं सत्त्वमालोक्य, शीलं चाऽतीव निर्मलम् ।
आवयोस्तोषमभजत्सप्रियश्च दिवस्पतिः ॥ १२७॥
ज्वालाकरालाज्ज्वलनात्ततस्तेनाऽपहृत्य नौ ।
आनाययत्सुरैः सद्यः, स्वर्गं स गुणिवत्सलः ॥ १२८॥

---

१. पश्चात्तापतप्ताः । २. अकथयत् ।

इच्छोपनतसर्वाङ्गसुखसम्पत्तयः सुराः ।
यत्राल्पपुण्यैर्दुष्प्रापैः, प्राच्यं सत्कर्म भुञ्जते ॥ १२९॥
सर्वाङ्गीणसुखाभोगभाजो येऽत्र नृपादयः ।
यत्र सर्वजघन्यर्द्धेः, शतांशं प्राप्नुयुर्न ते ॥ १३०॥
आवां हि सर्वद्रष्टव्याऽवधिं तं[1] वीक्ष्य ताविषम् ।
मन्वहे सफलं स्त्रष्टुर्दृष्टिसृष्टिश्रमं तदा ॥ १३१॥
ईदृग्महर्द्धिमुदिता, अपि ते त्रिदशाः परम् ।
राजन् ! मर्त्त्यत्वमीहन्ते, नव्यपुण्यार्जनार्थिनः ॥ १३२॥
यदुक्तं श्रीमति स्थानाङ्गे—
*"[2]तओ ठाणाइं देवेहिं पीहिज्जा तं जहा माणुस्सगं भवं आरियखित्ते जम्मं सुकुलपच्चाइअं जाइं" ॥*
अथाऽसपत्नं सर्वोर्वीराज्यं वत्साऽप्नुहि ह्यमुम् ।
वरं प्रादाद्धरिस्तुष्टः, सर्वाङ्गालङ्कृतीश्च मे ॥ १३३॥
त्वमखण्डमवैधव्यं, शुद्धशीले सदाऽऽप्नुहि ।
आनन्द्येत्याऽशिषा चास्यै,शची स्वालङ्कृतीर्ददौ ॥ १३४॥
प्राग् निजापत्यविरहोऽद्भुतदुःखाऽनभिज्ञयोः ।
पित्रोर्दुःखमपीदानीं, मा भूद्युष्मद्वियोगजम् ॥ १३५॥
स वास्तो[3]ष्पतिरित्यऽन्यदुःखदुःखितहृत्पुनः ।
आवां हि प्रैषयत्क्षिप्रं, मर्त्यलोकेऽत्र सम्प्रति ॥ १३६॥
प्रवृत्तिमेतां परितः, पारम्पर्यात्प्रसारिणीम् ।
अत्याश्चर्यमयीं श्रुत्वा, नृपास्तेऽपि विरोधिनः ॥ १३७॥

---

१. स्वर्गम्।

२. "त्रिभ्यः स्थानेभ्यः देवा अपि स्पृहयेयुः।
तद्यथा मानुष्यकं भवं आर्यक्षेत्रे जन्म सुकुलप्रत्ययिकीं जातिम्"। इति च्छाया ।

३. इन्द्रः।

स्वं निःसत्त्वतया तैस्तैः, सत्फलैर्वञ्चितं तदा ।
मन्यमानाः स्वदुर्दैवमेवाऽनिन्दन् विषादिनः ॥ १३८ ॥ युग्मम् ॥
इत्थं पाणिग्रहमहप्रत्यूहे[1] प्रलयं गते ।
वीरसेननृपो हृष्टः, सुलग्ने सुमहोत्सवम् ॥ १३९ ॥
रूपसौभाग्यलावण्यैः, स्मरेणेव वपुष्मता ।
रत्नपालकुमारेण, तां कन्यामुदवाहयत् ॥ १४० ॥ युग्मम् ॥
सत्याप्यमानः स्वजनैस्तथ्यैरातिथ्यकर्मभिः ।
रत्नपालः कियत्कालं, तत्राऽस्थाच्छ्वशुरौकसि ॥ १४१ ॥
महातीर्थ इव स्थातुं, सुचिरं श्वशुरौकसि ।
न युज्यते हि महतां, यन्महत्त्वक्षितिस्ततः ॥ १४२ ॥
यदुक्तम्—
*"चिरं पितृगृहे स्त्रीणां, नराणां श्वशुरौकसि ।*
*वासश्चैकत्र यमिनां, नूनं हास्यास्पदं जने" ॥ 16 ॥*
महानुभावः स सुधीरिति सम्यग् विदन् हृदि ।
चलनोन्मुख एवास्थात्परं स्वनगरं प्रति ॥ १४३ ॥ ( अर्थतो विशेषकम् )
गजाश्वमणिमुक्ताद्यैः, क्ष्माभुजा सत्कृतोऽथ सः ।
समं शृङ्गारसुन्दर्या, ससैन्यः स्वपुरेऽगमत् ॥ १४४ ॥
परिणीयागतस्याऽस्य, पुरान्तः प्रवरोत्सवैः ।
प्रवेशं कारयामास, पिता प्रमुदिताशयः ॥ १४५ ॥
महौजसं महोत्साहमाकलय्य तमङ्गजम् ।
राज्ये न्यवीविशत्सोऽथ, मन्त्रिसामन्तसाक्षिकम् ॥ १४६ ॥

---
1. विघ्न ।

शिक्षामदादिति स्नेहात्परिणामहितां पुनः ।
दण्डनीया दुरात्मानः, पालनीयाश्च साधवः ॥ १४७॥

यदुक्तम्—

*"दुष्टस्य दण्डः सुजनस्य पूजा, न्यायेन कोशस्य च सम्प्रवृद्धिः ।*
*अपक्षपातो रिपुराष्ट्ररक्षा, पञ्चैव यज्ञाः कथिता नृपाणाम्" ॥17॥*

अविश्वास्याः श्रियं हृत्वा, कर्षणीयाः स्वनीवृतः ।
विश्वासार्हाः पुनर्वत्स !, प्रापणीयाः परां श्रियम् ॥ १४८॥
पुत्रा मित्राणि पितरौ, लोभेन भ्रातरोऽपि वा ।
राज्येऽन्योन्यं निहन्यन्ते, तेनैतत्सुमलीमसम् ॥ १४९॥
न विश्वसेदमित्रस्य, मित्रस्यापि न विश्वसेत् ।
इदं पद्यं विदन् वत्स !, मा कस्याप्यत्र विश्वसीः ॥ १५०॥
सोऽथ संविग्नहृत्कृत्वा, चैत्येष्वष्टाह्निकामहम् ।
दत्त्वा दानं च दीनादौ, जैनीं दीक्षामुपाददे ॥ १५१॥
सुदुस्तपं तपस्तप्त्वा, स्वाध्यायाध्ययनोद्यतः ।
शुभध्यानाऽधिरूढात्मा, कालेऽभूत्स्वर्गसौख्यभाक् ॥ १५२॥
रत्नपालोऽथ भूपालः, प्रतापी पालयन्प्रजाः ।
नैकाः स्वयंवरायाताः, परिणिन्ये नृपाङ्गजाः ॥ १५३॥
शृङ्गारसुन्दरीमुख्याः, पत्न्यस्तस्याऽभवन्क्रमात् ।
सहस्रं रूपसौभाग्यलावण्यललितश्रियः ॥ १५४॥
जयनाम्नि महामात्ये, राजनीतिविदप्यसौ ।
राज्यभारं निवेश्याऽथ, कृत्वा दुग्धमिवौतुसात्[१] ॥ १५५॥
निश्चिन्तः पञ्चधा कामभोगान्भुङ्क्तेऽतिशायिनः ।
नित्यमन्तःपुरगतः, खेलन्सुखसुधाम्बुधौ ॥ १५६॥ युग्मम्॥

१. बिडालाधीनम् ।

हस्तायातमिदं राज्यमात्मसात्कृत्य साम्प्रतम् ।
क्ष्मानाथममुमुच्छेद्य,स्यामेवाहं महीपतिः ॥ १५७॥
विमृश्यैवं हृदि तदा, जयामात्यो दुराशयः ।
दानमानादिना सैन्यं, सर्वमात्मीयमातनोत् ॥ १५८॥
कुतश्चित्सिद्धपुरुषादाप्तया सिद्धविद्यया ।
निद्रामवस्वापिनीं च, सोऽदात्तस्मै महीभुजे ॥ १५९॥
तया प्रनष्टचैतन्यं, तं पल्यङ्कस्थमेव सः ।
आप्तैर्भृत्यैर्[1]रथोत्पाट्य, दूराटव्याममूमुचत् ॥ १६०॥
यन्नृशंसः स तं क्ष्मापं, नूनं नामारयत्तदा ।
पक्त्रिमं तत्र तत्प्राच्यपुण्यमेवान्तराऽभवत् ॥ १६१॥
इतश्चाऽनन्यसामान्यां, प्राप्य तां राज्यसम्पदम् ।
तेन पापीयसोन्मत्तचित्तेन जयभूभुजा ॥ १६२॥
चक्रे महासतीमेकां, हित्वा शृङ्गारसुन्दरीम् ।
रत्नपालनृपाऽशेषान्तःपुरीशीलविप्लवः ॥ १६३॥ युग्मम् ॥
तेन कर्मश्वपाकेन, सापि शृङ्गारसुन्दरी ।
प्रार्थ्यते स्म प्रतिदिनं, विविधैश्चाटुभाषितैः ॥ १६४॥
परं शुद्धान्वयोद्भूता, दृढसत्त्वाशया सती ।
तस्य नह्यदधच्चाटुवचांसि[2] श्रवणेऽपि सा ॥ १६५॥
रागान्धस्त्यक्तमर्यादः, स ततोऽनुदिनं क्रुधा ।
पञ्चशत्या कशाघातैस्ताडयामासतां सतीम् ॥ १६६॥
शिरीषसुकुमाराङ्गी, निकृष्टहृदयः स ताम् ।
दृढैर्ज्वलद्भिः सन्दंशैस्त्रोटयामास चासकृत्[3] ॥ १६७॥

---

१. 'मर्त्यैः' इत्यपि । २. अपिबत् । प्रियवचनानि नाऽशृणोदित्यर्थः । ३. 'भूरिशः' इत्यपि ।

तस्याश्चैवं हठारूढः, स शठः स्वेष्टसिद्धये ।
नैकप्रकारा विदधे, मासमेकं कदर्थनाः ॥ १६८ ॥
प्राणेभ्योऽप्यधिकं शीलं, मन्यमाना परं न सा ।
मनसाप्यस्खलच्छुद्धसदाचाराध्वनो मनाक् ॥ १६९ ॥
इतश्च कुशलः कश्चिद्वयस्यस्तस्य भूभुजः ।
अनुशास्तिमिति प्रादात्, परिणामहितां रहः ॥ १७० ॥
शुद्धशीलानुभावेन, महासत्यो महीपते ! ।
स्थलयन्त्याशु जलधिं, स्थलं जलधयन्ति च ॥ १७१ ॥
ज्वलनं जलयन्त्येता, जलं ज्वलनयन्ति च ।
शैलं वल्मीकयन्त्याशु, वल्मीकं शैलयन्ति च ॥ १७२ ॥
रक्षोयक्षोरगव्याघ्रान्, दमयन्ति दुरात्मनः ।
स्वचक्रं परचक्रं च, स्तभ्नन्त्यागंच्छदेव वा ॥ १७३ ॥
कुपिताः कर्हिचिच्चैताः, शापदानेन सत्वरम् ।
सपुत्रभ्रातृकं भूपमपि कुर्वन्ति भस्मसात् ॥ १७४ ॥
स्वामिन्निहार्थे दृष्टान्तं, शृणु रत्नपुरे पुरे ।
सार्थेशधनसारस्य, धनश्रीः समभूत्प्रिया ॥ १७५ ॥
तामन्यदा गवाक्षस्थां, रूपसौभाग्यशालिनीम् ।
विद्याभृन्नृपतिः पापप्रकृतिः कश्चिदैक्षत ॥ १७६ ॥
रागान्धः प्रार्थयामास, स तां चाटुशतैस्तदा ।
वचस्तस्य सती सा तु, नान्वमंस्त मनागपि ॥ १७७ ॥
स्मरापस्मारतो मूढमना विद्याबलेन सः ।
अथ तस्याः सदाचारध्वंसाय यतते यदा ॥ १७८ ॥
रे पाप्मन् ! पुत्रसप्ताङ्गराज्यश्रीक्षयमाप्नुहि ।
इति शापमदात्तस्मै, तदा सा कुपिता सती ॥ १७९ ॥

स विद्याभृदथ प्रोचे, सम्प्रत्यस्ति दिनं परम् ।
रात्रावेत्य हरिष्ये त्वां, यद्भाव्यं तद्भवत्विति ॥ १८० ॥

साऽपीत्याख्यन्मदुक्तोऽद्य, रविरस्तं प्रयास्यति ।
दुष्टाकूतोऽथ विद्याभृत्, स यावत्स्वपुरं ययौ ॥ १८१ ॥

तावदुत्पन्नहृच्छूलस्तस्याकस्मान्मृतः सुतः ।
अश्वेभं[1] च मृतं तावत्किञ्चित्किञ्चिद्गतं क्वचित् ॥ १८२ ॥

धनधान्यमणिस्वर्णरूप्यकुप्यादिवस्तुभिः ।
पूर्णं वज्राग्निना तावत्, तद्वेश्म ज्वलितं द्रुतम् ॥ १८३ ॥

अकस्मात्केचिदज्ञाताश्चतुरङ्गबलान्विताः ।
तावत्सपत्नास्तत्रेयुर्निःसपत्नपराक्रमाः ॥ १८४ ॥

देशदुर्गादि तैस्तस्य, प्रसह्यागृह्यताऽखिलम् ।
एवं दिनत्रयेणाऽभूज्जनमात्रं नृपोऽपि सः ॥ १८५ ॥

दुःखादुपरि हा ! दुःखं, किमेतन्मे नवं नवम् ।
विषादाद्विस्मयाच्चेत्थं, स यावद्ध्यायति क्षणम् ॥ १८६ ॥

तावत्खेटस्तमाहैकः, स्वामिन्नाश्चर्यमद्भुतम् ।
दृष्टं नन्दीश्वरद्वीपादद्याऽत्रागच्छता मया ॥ १८७ ॥

पुरे रत्नपुरे नाऽस्तं, रविर्यात्यादिनत्रयात् ।
राज्ञा तदर्थं कार्यन्ते, शान्तिकादीनि सर्वतः ॥ १८८ ॥

तच्छ्रुत्वा चकितश्चित्ते, सोऽध्यासीदिति खेटराट् ।
वचसैषा ह्यभूत्तस्याः, सर्वाऽप्याश्चर्यसन्ततिः ॥ १८९ ॥

हा ! हा ! विरूपमाचीर्णं, दुर्वृत्तेन मया तदा ।
महानुभावा यद्दर्पात्कोपिता सा महासती ॥ १९० ॥

---

1. पशु व्यञ्जनानां सि. ३-१. थी સમાહાર દ્વન્દ્વ

तत्तां तत्र पुरे गत्वा, क्षमयामि महासतीम् ।
भावी वज्राग्निवच्छापो, दुःसहोऽद्यापि सोऽन्यथा ॥ १९१॥
अथ तत्र पुरे गत्वा, पतित्वा पादयोश्च सः ।
प्रादुष्कुर्वन् स्वदुर्वृत्तं, पश्चात्तापावतप्तहृत् ॥ १९२॥
नृपपौरजनाध्यक्षं, क्षमयामास तां सतीम् ।
ततस्तदुक्तस्तरणिः, समयेऽस्तं समासदत् ॥ १९३॥ युग्मम्॥
तयाऽनुनीतया शापान्मुक्तः सोऽथ नभश्चरः ।
तानरातीन् क्रमाज्जित्वा, भेजे राज्यश्रियं पुनः ॥ १९४॥
इति सत्योऽनुभावाढ्याः, कुशलैः कुशलार्थिभिः ।
आराध्यन्ते सदा स्वामिन् !, विराध्यन्ते तु न क्वचित् ॥ १९५॥
हिताऽनुशास्तिं सुहृदस्तां श्रुत्वा जयभूपतिः ।
अभूच्छृङ्गारसुदर्यां, प्रशान्तहृदयो मनाक् ॥ १९६॥
तादृग्विडम्बनातोऽथ, विमुक्ता जयभूभुजा ।
आचामाम्लतपस्तेनेऽनुदिनं सा पतिव्रता ॥ १९७॥
पक्षमासोपवासाद्यं, सा सदाऽप्यन्तरान्तरा ।
तप्यते स्म तपस्तीव्रं, निरपेक्षा वपुष्यपि ॥ १९८॥
स्नानाऽङ्गरागसंस्कारसद्वस्त्रऽलङ्कृतीः सदा ।
वर्ज्जयन्ती जिनेन्द्राऽर्च्चानिरता भुवि साऽस्वपीत् ॥ १९९॥
भर्तुर्वियोगं राज्यश्रीभ्रंशं चाऽतीव दुःखदम् ।
स्मरन्ती हृदि सा मर्त्तुमीहते स्म महासती ॥ २००॥
मेलिष्यति तव प्रेयान्, राज्यमाप्स्यति चाऽचिरात् ।
इति नैमित्तिकोक्त्या तु, साकाङ्क्षा प्राणिति स्म सा ॥ २०१॥

इतश्च यस्यां वेलायां, रत्नपालः स सुप्तवान् ।
तस्यां प्रबुद्धः परितो, महारण्यमलोकयत् ॥ २०२॥
मर्त्यप्रचाररहितं, गहनं विविधद्रुमैः ।
अथ श्वापदसङ्कीर्णं, तद्वीक्ष्यैवमचिन्तयत् ॥ २०३॥
पश्याम्येतं किमु स्वप्नमिन्द्रजालमिदं नु वा ? ।
कश्चिद्वा सम्प्रति मतिव्यामोहोऽयं ममाऽपतत् ॥ २०४॥
यन्नानामङ्गलातोद्यबन्दिस्वनमनोहरः ।
स्वःसद्मेव ममावासः, सर्वेन्द्रियसुखः क्व सः ? ॥ २०५॥
क्वैतत्स्थानं यमस्थानमिवाऽत्यन्तभयावहम् ? ।
काकोलोलूकभल्लुकास्तोककोलाहलाऽऽकुलम् ॥ २०६॥
राज्यलोभेन वा जाने, सचिवेन दुरात्मना ।
ईदृग्दुःखमहाम्भोधौ, विश्वस्तः पातितोऽस्म्यहम् ॥ २०७॥
सुप्तस्योत्सङ्गमारुह्य, ममाद्यामोटितं गलम् ।
तेन[1] कृत्ता वरत्रा वा, हा ! क्षिप्त्वा मां महाऽवटे ॥ २०८॥
भक्ता मम कमायाता, दानसम्मानसत्कृताः ।
राज्यप्रधानपुरुषाः, कथं तेनात्मसात्कृताः ? ॥ २०९॥
सदा सन्तोष्यमाणा वा, द्रविणैर्मुखमार्गितैः ।
अङ्गरक्षानियुक्तास्ते, कथं विघटिता मयि ? ॥ २१०॥
सर्वो वाऽनुगतो लोकः, पुंसः सम्पदमीयुषः ।
तस्यैव त्वापदापत्तौ, सम्बन्ध्यपि भवेत्परः ॥ २११॥
यदुक्तम्—
*"सम्पदि परोऽपि निजतां, निजोऽपि परतामुपैति विपदि जनः ।*
*ताराभिर्व्रियते निशि, रश्मिभिरपि मुच्यतेऽह्नि शशी" ॥ 18 ॥*

---
1. અથવા તો હા! તેના વડે મને મોટા કુવામાં નાખીને દોરી કાપી નંખાઈ.

भाग्यभ्रष्टस्य वा पुंसो, भक्तिमन्तोऽनुजीविनः ।
किं विदध्युरिवाऽन्धस्य, ज्योतिष्मन्तोऽर्यमादयः ? ॥ २१२॥
प्राच्यकर्माऽनुभावेन, सम्पदो विपदोऽपि वा ।
सम्पद्यन्ते स्वयं पुंसां, न त्वन्यस्माद्यदुच्यते ॥ २१३॥
*"सुखस्य दुःखस्य न कोऽपि दाता, परो ददातीति कुबुद्धिरेषा।*
*पुरा कृतं कर्म तदेव भुज्यते, त्वं जीव! हे! निस्तर यत्त्वया कृतम्*
*॥ 19॥*

तथा—
*"सुखदुःखानां कर्त्ता, हर्त्ता न च कोऽपि कस्यचिज्जन्तोः ।*
*इति चिन्तय सद्बुद्ध्या, पुराकृतं भुज्यते कर्म" ॥ 20॥*
सम्प्रत्यभाग्योपनतां, तद्भुञ्जे दुर्दशामिमाम् ।
पश्चात्कर्मानुकूल्ये तु, सर्वं साध्वेव भावि मे ॥ २१४॥
यतः—
*"छिन्नोऽपि रोहति तरुः, क्षीणोऽप्युपचीयते पुनश्चन्द्रः ।*
*इति विमृशन्तः सन्तः, परितप्यन्ते न विधुरेऽपि" ॥ 21॥*
प्राच्यतादृक्सुखाभोगे, दुःखापाते च तादृशे ।
आसीत्सत्त्वभृतस्तस्य, समानैव मुखच्छविः ॥ २१५॥
यदुक्तम्—
*"उत्सवव्यसनयोः प्रभुर्विधिर्विक्रियासु महतामनीश्वरः ।*
*पश्यतामुदयमेति यादृशस्तादृशस्तरणिरस्तमीयते" ॥ 22॥*
अथोत्थाय स पल्यङ्काद्वीक्षमाणोऽभितो वनम् ।
आलोक्यैकं महाशैलं, तत्रारोहच्छनैः शनैः ॥ २१६॥
स तत्र कौतुकाक्षिप्तः, पश्यन्नथ वनश्रियम् ।
नरं निबद्धमैक्षिष्ट, द्रुमूले सुन्दराकृतिम् ॥ २१७॥

तद्ग्रन्थान् कृपया च्छित्वा, सोऽथाप्राक्षीत्तमानतम् ।
कोऽसीत्थं केन बद्धश्च, कस्मादिति वद स्फुटम् ॥ २१८॥
सोऽप्येवमाख्यद्वैताढ्ये, पुरे गगनवल्लभे ।
वल्लभो नाम राजास्ते, विद्याभृद्बलभिद्बलः ॥ २१९॥
अहं तदङ्गजन्माऽस्मि, नाम्ना हेमाङ्गदः सखे ! ।
नन्दीश्वरे जिनान्नन्तुं यानभूवं[1] प्रियायुतः ॥ २२०॥
खेटोऽत्र राक्षसीविद्याबलोन्मत्तोऽमिलत्पथि ।
प्रियामहार्षीत्प्रसभं, मां निबध्याऽधुनैव सः ॥ २२१॥
प्राणप्रद !, जगद्वीर! तत्साहाय्यं सृजाऽधुना ।
जित्वाऽरातिं तमाप्नोमि,यथा प्राणेश्वरीमहम् ॥ २२२॥
इत्थमर्थयते यावद्रत्नपालं स खेचरः ।
तावदागाद्यमाकृष्ट, इव तत्र स राक्षसः ॥ २२३॥
परस्त्रीलुब्ध ! पापिष्ठ !, स्मर स्वाऽभीष्टदैवतम् ।
शास्ता दुरात्मनामद्य, रत्नपालस्तवाऽमिलत् ॥ २२४॥
इत्युक्त्वा योधितः खड्गाखड्गि स क्ष्माभुजा चिरम् ।
पराजितश्च भीतात्मा, जीवग्राहं स नष्टवान् ॥ २२५॥
इत्थं हेमाङ्गदस्यार्थं, गिराऽनुक्त्वैव सोऽकरोत् ।
ब्रुवते हि फलेनैव, साधवः सोपयोगिताम् ॥ २२६॥
हृष्टो हेमाङ्गदोऽथाप्य[2], पत्नीमित्यब्रवीन्नृपम् ।
किं कुर्वेऽद्य तवाभीष्टं, निर्निमित्तोपकारिणः ॥ २२७॥
तदाख्यद्रत्नपालोऽपि, न मे किञ्चिद्विलोक्यते ।
सप्रियः स्वपुरे गत्वा, चिरं भुङ्क्ष्व सुखं सखे! ॥ २२८॥

---

१. यान् गच्छन्, अभूवं आसम् । २. 'अवाप्य' इत्यपि ।

यदुक्तम्—

*"उपकृत्योपकार्येषु, ये भवन्त्यर्थिनः पुनः ।*
*तेषु मन्ये मनुष्यत्वं, विधेर्वार्द्धकविक्रिया" ॥ 23 ॥*

नृपायाऽनिच्छतेऽप्येवं, कृतज्ञः स खगो बलात् ।
औषधीवलयं सर्वविषावेगाऽपहं ददौ ॥ २२९ ॥

अथानुज्ञाप्य स नृपं, सप्रियः स्वपुरेऽगमत् ।
क्ष्मापालः पुनरुत्तीर्णः, शैलशृङ्गाच्छनैः शनैः ॥ २३० ॥

मूलस्थानपुरेऽथाप्तो, दीनानाथकुटीस्थितम् ।
नृपो वैदेशिकश्राद्धं, भृशं ग्लानं व्यलोकत ॥ २३१ ॥

दिनत्रयं नृपेणैष,करुणार्द्रहृदा तदा ।
शुश्रूषितो धर्मबुद्ध्या, नानापथ्यौषधादिभिः ॥ २३२ ॥

स कारिताऽखिलप्रान्तपुण्यकृत्योऽथ भूभुजा ।
समाहितमना मृत्वा, दिवि देवो महानभूत् ॥ २३३ ॥

रत्नपालोऽथ नृपतिः, प्रभाते प्रविशन्पुरे ।
पटहोद्घोषणामेवं, श्रुतवान् राजवर्त्मनि ॥ २३४ ॥

भो मन्त्रतन्त्रादिविदो ! बलवाहनभूभुजः ।
अद्य रत्नवती पुत्री, दष्टा दुष्टाहिना निशि ॥ २३५ ॥

कृतैर्नानाप्रतीकारैरप्यजातगुणा च सा ।
निश्चेष्टा मरणावस्थां, साम्प्रतं समुपेयुषी ॥ २३६ ॥

यः कश्चिज्जीवयत्येतां, मन्त्रतन्त्रौषधीबलैः ।
तस्मै राज्यार्द्धसंयुक्तामेतां दत्ते स भूपतिः ॥ २३७ ॥

तदैवागण्यकारुण्यनैपुण्यान्निःस्पृहोऽपि सः ।
जगाम पटहस्पर्शद्वारेण क्ष्मापसंसदि ॥ २३८ ॥

घटते कश्चिदाम्नायः, शुद्धोऽस्मिन्निःसमाकृतौ ।
इति ध्यायन्नृपस्तस्मै, सादरं तामदीदृशत् ॥ २३९॥

आडम्बराणि पूज्यन्ते, स्त्रीषु राजकुलेषु च ।
विमृश्यैवं च तत्र प्राक्, स नानाडम्बरं व्यधात् ॥ २४०॥

तदौषधीरसेनाथ, विषावेगं निरस्य सः ।
तां सद्यो जीवयामास, हृदि हृष्टश्च तत्पिता ॥ २४१॥

न ज्ञायते कुलाद्यस्येतीषद् हृदि विषादभाग् ।
वाग्बद्धोऽथ ददौ तस्मै, स राज्यार्द्धयुतां कनीम् ॥ २४२॥

पुत्रो विनयपालस्य, रत्नपालः पराक्रमी ।
नूनं राजाधिराजोऽयं,केनचिद्धेतुनैककः ॥ २४३॥

भट्टैरित्युपलक्ष्योक्ते, बलवाहनभूमिभुग् ।
स्थाने पुत्री प्रदत्तेति,सुतरां मुमुदे हृदि ॥ २४४॥

रत्नवत्या समं पत्न्या, विलसन्पञ्चधा सुखम् ।
अप्याप्तातुलराज्यश्री, रत्नपालोऽथ भूपतिः ॥ २४५॥

विश्वासद्रोहमाचीर्णं, सचिवेन दुरात्मना ।
तमुत्कीर्णमिव स्वान्ते, व्यस्मार्षीन्नहि कर्हिचित् ॥ २४६॥ युग्मम्॥

यदुक्तम्—

*"मृगेण दत्तां किं लत्तां, विस्मरेज्जातु केसरी ।*
*यत्तां स नूनं समये, सव्याजां वालयिष्यति" ॥ 24 ॥*

इतश्चान्यूनसैन्येन, सहितः समये नृपः ।
तममात्यब्रुवं जेतुं, चचाल स्वपुरं प्रति ॥ २४७॥

अन्यदाऽध्वनि कान्तारे, सैन्यमावास्य स स्थितः ।
निशीथे दूरतोऽश्रौषीद्दिव्यगीतध्वनिं क्वचित् ॥ २४८॥

कृपाणपाणिरेकाकी, तत्रागात्कौतुकेन सः ।
प्रासादमेकं चाद्राक्षीत्तुङ्गशृङ्गं सुधोज्ज्वलम् ॥ २४९ ॥
तत्र प्रविशति क्ष्मापः, स यावत्सत्त्वसेवधिः ।
तावत्सखीभिः सहिता, काचिद्विद्याभृतः कनी ॥ २५० ॥
जिनाग्रे गीतनृत्यादीन्, विधाय विविधोत्सवान् ।
रम्यं विमानं चारुह्य, स्वस्थानमगमद् द्रुतम् ॥ २५१ ॥ युग्मम् ॥
अथ प्रविष्टः प्रासादे, प्रतिमां प्रथमार्हतः ।
प्रणम्य परितो भ्राम्यन्, दिदृक्षू रमणीयताम् ॥ २५२ ॥
सौभाग्यमञ्जरीनामाङ्कितं निपतितं पुरः ।
तत्र दिव्यं स वलयं, वीक्ष्य क्ष्मापतिरग्रहीत् ॥ २५३ ॥ युग्मम् ॥
प्रातरागत्य कटकं, पुरतश्चलितोऽथ सः ।
क्रमेणाप्तः स्वराज्याप्तिसोत्कण्ठः स्वपुरान्तिकम् ॥ २५४ ॥
अथ तं राज्यमादातुमागच्छन्तं महौजसम् ।
श्रुत्वा विषादमापन्नो, जयराजो व्यचिन्तयत् ॥ २५५ ॥
प्रौढिमाप्तस्य मे कर्त्ता, किं वराकोऽयमेककः ।
मयेति बुद्ध्या यज्जीवन्, मोचितोऽयं तदा वने ॥ २५६ ॥
मन्ये दुर्दैवनुन्नेन, तन्मया कुधिया हहा! ।
विपुच्छीकृत्य कृष्णाहिर्मुच्यते स्म स्वमृत्यवे ॥ २५७ ॥
यदुक्तं राजनीतौ—
*"विराध्यते न नीतिज्ञैर्महानात्महितार्थिभिः ।*
*कर्हिचित्स विराद्धश्च, तर्हि जीवन् न मुच्यते" ॥ 25 ॥*
अन्यत्राप्युक्तम्—
*"उत्तिष्ठन्तो निवार्यन्ते, सुखेन व्याधिशत्रवः ।*
*भवन्त्युपायासाध्यास्ते, बद्धमूलास्तु मृत्यवे" ॥ 26 ॥*

मुग्धोचितेन वातीतशोचनेनाऽमुना कृतम् ।
किन्त्वद्य सम्मुखीभूय, म्रिये वा मारयाम्यमुम् ॥ २५८॥
स्वर्गाप्तिः स्वमृतौ शौर्य्याद्राज्याप्तिश्चाऽरिमारणे ।
शूराणां युधि तन्नूनं,मोदकौ हस्तयोर्द्वयोः ॥ २५९॥
अथेत्थं धैर्यमालम्ब्य, स चित्ते सचिवाऽधमः ।
राज्ञः सम्मुखमागत्य, ससैन्यः समरेऽमिलत् ॥ २६०॥
खड्गैः कुन्तैः शरव्रातैः, गदाभिर्मुद्गरैस्तथा ।
तत्र क्रूराशयाः शूरा, मिथो युयुधिरे चिरम् ॥ २६१॥
रत्नपालनृपालस्य, सैन्येनातिबलीयसा ।
जयामात्याधमस्याथ, सर्वं सैन्यमभज्यत ॥ २६२॥
पलायमानं तद्वीक्ष्य, तदा क्रुद्धेन मन्त्रिणा ।
मुक्तावस्वापिनी निद्रा, नृपसैन्ये प्रसृत्वरी ॥ २६३॥
तया प्रनष्टचैतन्यं, नृपतेर्निखिलं बलम् ।
नाज्ञासीदथ शस्त्राणि,हन्त हस्ताद्गलन्त्यपि ॥ २६४॥
सर्वकृत्यालसं वीक्ष्य, ज्येष्ठमासीव सत्तदा ।
पतितः सुमहाकष्टे, व्यषीदत्स नृपो हृदि ॥ २६५॥
अथ वैदेशिकग्लानश्राद्धो योऽभूत्सुरः पुरा ।
प्रत्युक्ताऽवधिरैक्षिष्ट, स तं पतितमापदि ॥ २६६॥
तदा प्रत्युपकाराय, स तत्रागत्य कृत्यवित् ।
हृत्वावस्वापिनीं राज्ञः, स्वस्थीचक्रेऽखिलं बलम् ॥ २६७॥
अथ तत्सुरसांनिध्योद्भूताऽद्भुतबलं बलम् ।
प्रावर्त्तत पुनर्योद्धुं, सोत्साहं सह शत्रुभिः ॥ २६८॥
स्वस्थीभूते तदा सैन्ये, रत्नपालस्य भूभुजः ।
क्षीणविद्याबलो मन्त्री, निराशोऽभूज्जयश्रियाम् ॥ २६९॥

दुष्कर्मोष्मविलीनात्मशक्तिर्भक्तिमदर्शयन् ।
प्राप्तस्तत्र विपद्याऽथ, स पापः सप्तमावनौ ॥ २७० ॥
पुष्पवृष्टिं विदधतां, नृपमूर्ध्नि दिवौकसाम् ।
धर्मे जयः क्षयः पाप, इत्यभूवन् गिरश्च खे ॥ २७१ ॥

प्रादुर्भूयाऽथ देवोऽवक्, त्वया शुश्रूषितस्तदा ।
ग्लानो वैदेशिकश्राद्धः, समाहितमना मृतः ॥ २७२ ॥
देवभूयं[1] गतः सोऽहं, तवायातेऽद्य सङ्कटे ।
आगां जयश्रियं दातुं, हत्वावस्वापिनीं सखे ! ॥ २७३ ॥
इत्युक्त्वा स सुरः स्वर्णरत्नकोटीः परःशताः ।
रत्नपालनृपस्याग्रे, वृष्ट्वा च दिवि जग्मिवान् ॥ २७४ ॥
विजित्याऽथ जयाऽमात्यं, पौरक्लृप्तैर्महामहैः ।
स्वराज्यपुर्यामविशत्स प्रियामिलनोत्सुकः ॥ २७५ ॥
हृद्यैर्भोज्यैर्विधायाऽथ, पारणं पत्युराज्ञया ।
चक्रे सर्वाङ्गशृङ्गारं, हृष्टा शृङ्गारसुन्दरी ॥ २७६ ॥
तास्ताः स्वशीलरक्षार्थं, श्रुत्वा सोढाः कदर्थनाः ।
नृपश्रेष्ठश्च मुदितः, पट्टराज्ञीमिमां व्यधात् ॥ २७७ ॥
अथ पालयतो राज्यं, तस्य भूभर्त्तुरन्यदा ।
इति व्यजिज्ञपन्प्रातः, केचिदेत्य वनेचराः ॥ २७८ ॥
गिरिप्रायवपुर्वन्यः, कुतश्चिज्जात्यकुञ्जरः ।
प्राप्तः प्रणुन्नस्ते पुण्यैरुद्याने राजकुञ्जर ! ॥ २७९ ॥
कौतुकेन वशीकर्त्तुमथ तं वन्यहस्तिनम् ।
कुशलो गजशिक्षायां, तत्र प्राप्तो नृपः स्वयम् ॥ २८० ॥

1. દેવપણું

पुञ्जीकृत्योत्तरीयं प्राग्, गजस्याग्रेऽथ सोऽक्षिपत् ।
क्रोधोद्बोधांन्मदोन्मत्तः, सोऽव्यात्सीत्तद्रदैर्मुहुः ॥ २८१ ॥
पृष्ठभागेऽथ स गजं, प्राहरद्दृढमुष्टिना ।
वलमानं भ्रमंश्चक्रभ्रमेणाऽखेदयच्च तम् ॥ २८२ ॥
सुचिरं खेदयित्वैवं, वशीकृत्य च भृत्यवत् ।
उत्प्लुत्य द्रुतमारूढो, यावदेतं स भूपतिः ॥ २८३ ॥
स तावद्वन्यकरटी, प्रकटीकृतकैतवः ।
अकस्मादुत्पपातोच्चैः, पक्षिराज इवाम्बरे ॥ २८४ ॥
चक्ररेखा इव नदीर्महाऽद्रीन्मूढकानिव ।
कीटिकानगराणीव, महान्ति नगराणि च ॥ २८५ ॥
अथ राजा व्रजन् व्योम्नि, सुदूरत्वादधो भुवि ।
सकौतुकं वीक्षमाणस्त्यक्तभीतिर्व्यभावयत् ॥ २८६ ॥ युग्मम् ॥
मित्रेणाऽनेन विविधाश्चर्या दर्शयितुं भुवम् ।
हृतोऽद्याऽहं शत्रुणा वा, क्वचित्क्षेप्सुं महापदि ॥ २८७ ॥
इति संशीतिमापन्नस्तटाके महति क्वचित् ।
हस्तिस्कन्धाददाज्झम्पां, स तीर्त्वा चागमत्तटम् ॥ २८८ ॥
तत्राऽथ दिव्यप्रासादे, प्रविष्टः पृथिवीपतिः ।
तृतीयभूमावैक्षिष्ट, भस्मपुञ्जौ महत्तरौ ॥ २८९ ॥
तयोरदूरतो नागदन्तके चाऽवलम्बितम् ।
रसेन पूर्णं प्रैक्षिष्ट, तुम्बकं सुमहन्नृपः ॥ २९० ॥
गृह्णानेऽथ नृपे तत्र, तुम्बकं तत्ससम्भ्रमम् ।
रसबिन्दोर्निपतनाज्जाते दिव्यस्त्रियौ च ते ॥ २९१ ॥
विस्मितोऽथ नृपोऽप्राक्षीद्दिव्यरूपे नु के युवाम्? ।
अस्मादकस्मादुद्भूते, भस्मपुञ्जद्वयादुभे ॥ २९२ ॥

नृपं सप्रेम पश्यन्त्यौ, ते अप्येवमवोचताम् ।
उभे महाबलस्यावां, सुते विद्याभृदीशितुः ॥ २९३ ॥
पत्रवल्लीमोहवल्लीनाम्यौ प्राप्ते च यौवनम् ।
खेटेनोद्वोढुकामेन, मातङ्गेन महौजसा ॥ २९४ ॥
आवां परेद्युर्हृत्वाऽत्र, मुक्ते विद्याकृते गृहे ।
ईर्ष्यालुचित्तश्च यदा, कुत्रचित्स यियासति ॥ २९५ ॥
तदावां विद्यया भस्मराशीकृत्य प्रयाति सः ।
अनेनोज्जीवयत्याशु, सरसेनागतः पुनः ॥ २९६ ॥
प्राप्तोऽस्यद्याऽत्र नौ पुण्यैर्वरं तस्मिन् गते क्वचित् ।
दुरात्मा स तु मा ज्ञासीत्सुन्दर ! त्वामिहागतम् ॥ २९७ ॥
इति ब्रुवाणयोरेव तयोर्विद्याबलोद्धतः ।
तत्रागमत्स मातङ्गस्तत्पाणिग्रहणोत्सुकः ॥ २९८ ॥
अद्याऽस्मदर्थं पुंरत्नमीदृग् हन्त हनिष्यति ।
अयं दुरात्मेति भृशं, विषीदन्मनसोस्तयोः ॥ २९९ ॥
मामजानन्तमेवैतमायान्तं हन्मि साम्प्रतम् ।
क्षत्राणां वा नैष धर्मस्तत्पूर्वं वादयाम्यमुम् ॥ ३०० ॥
नृपे च चिन्तयत्येवं, तत्राकस्मादुपेत्य सः ।
करेणोच्छाल्य दशनैर्धृत्वा तमवधीद्गजः ॥ ३०१ ॥ ( त्रिभिर्विशेषकम् )
नभोगामी गजः कोऽयं, किमर्थं चामुनाऽधुना ।
हतोऽयमिति साश्चर्यहर्षोऽभूत्स नृपस्तदा ॥ ३०२ ॥
इतश्च सुविषण्णात्मा, महाबाहुर्महाबलः ।
भ्रमन्स्वपुत्रीशुद्ध्यर्थं, तत्र सौधे समीयिवान् ॥ ३०३ ॥

नृपं च सकनीद्वन्द्वं, तत्रालोक्य मुदेत्यवग् ।
प्रोक्तं महानुभाव ! प्रागासीन्नैमित्तिकेन नः ॥ ३०४॥
यन्मातङ्गनभोगेन, विद्यया भस्मसात्कृतम् ।
कन्याद्वन्द्वमिदं दिव्यं, जीवयिष्यति यः पुमान् ॥ ३०५॥
यत्सांनिध्याय मातङ्गं, गजश्चैत्य हनिष्यति ।
स भावी ते सुताभर्त्ता, सत्यं सञ्जातमद्य तत् ॥ ३०६॥
अत्रान्तरे महोराशिरिवाविर्भूय सत्वरम् ।
कश्चित्सुपर्वा श्रीरत्नपालं सस्नेहमित्यवग् ॥ ३०७॥
तदा कृतं त्वया राजन्नुपकारं स्मरन्नहम् ।
जयामात्ययुधि प्राप्तस्तत्र दातुं जयश्रियम् ॥ ३०८॥
कन्याद्वयाप्त्यै त्वामद्याऽपाहरं द्विपरूपभाक् ।
दुरात्मानं च मातङ्गनभोगं हेलयाऽहनम् ॥ ३०९॥
एतद्दिव्यरसापूर्णं, सुप्रापं सुकृतात्मभिः ।
तुम्बकं चाधुना भ्रातर्गृहाणानुगृहाण माम् ॥ ३१०॥
चतुर्विंशतिवर्षाणि,कन्दमूलफलादिभुक् ।
प्रत्यहं प्रहरद्वन्द्वं, जपन्मन्त्रमधोमुखः ॥ ३११॥
होमं च तन्वन्मातङ्गविद्याभृदुष्करक्रियः ।
नागाधिनेतुः सन्तुष्टात्, प्राप दिव्यममुं रसम् ॥ ३१२॥ युग्मम्॥
अस्यैकबिन्दुना स्पृष्टा, लोहस्य पलकोटयः ।
स्वर्णीभवन्ति शाम्यन्ति, दुःसाध्या[१] व्याधयस्तथा ॥ ३१३॥
अस्य स्पर्शाद्विलीयन्ते, भूतप्रेताद्युपद्रवाः ।
व्यापार्यमाणोऽप्यनिशं,न च न्यूनीभवत्ययम् ॥ ३१४॥

---

१. 'दुःसाधा' इत्यपि ।

अनेन च जगज्जैत्रमहिम्ना तिलके कृते ।
अजय्यः स्यान्नरोऽवश्यं, युधि देवासुरैरपि ॥ ३१५ ॥
अथान्यदपि दुःसाधं, सर्वमेतेन सिद्ध्यति ।
अतिशेते ततश्चिन्तारत्नादीन्यप्ययं ध्रुवम् ॥ ३१६ ॥
कार्ये त्वयाहमुत्पन्ने, स्मरणीयः पुनः सखे ! ।
इत्युक्त्वा स तिरोभूतः, सुरो विद्युत्प्रकाशवत् ॥ ३१७ ॥
सांनिध्येन सुरस्यास्य, विस्मितोऽथ महाबलः ।
विमाने नृपमारोप्य, वैताढ्ये स्वपुरेऽनयत् ॥ ३१८ ॥
तत्र स्वपुण्योपनते, ते कन्ये सुन्दराकृती ।
परिणिन्ये स भूजानिर्महाबलकृतैर्महैः ॥ ३१९ ॥
महाबलाद्यैर्विद्याभृद्वीरैर्विनयवामनैः ।
तत्र सत्क्रियमाणश्च, दिनान्यस्थात्स कत्यपि ॥ ३२० ॥
इतश्च तत्रैव गिरौ,पुरे गगनवल्लभे ।
आस्ते वल्लभभूभर्त्तुर्बली हेमाङ्गदः सुतः ॥ ३२१ ॥
अन्वर्थसंज्ञा दुहिता, पुनः सौभाग्यमञ्जरी ।
कलाकलापकुशला, क्रमाद्यौवनमीयुषी ॥ ३२२ ॥
पुण्यैः प्रसन्नमनसा, कुलदेव्याऽन्यदा ददे ।
दिव्यं रत्नमयं तस्यै, वलयं सर्वकामदम् ॥ ३२३ ॥
समं सखीभिः सानन्दं, तस्याश्च जिनसद्मनि ।
नृत्यन्त्या निशि तद्दैवात्प्रकोष्ठाद्गलितं क्वचित् ॥ ३२४ ॥
अबालप्रकृतिर्बाला, ततः प्रभृति खेदभाग् ।
हित्वा सा सरसाहारं, फलाहारा तपस्यति ॥ ३२५ ॥

पृष्टः सौवं[1]सुतादुःखदुःखितेनाऽथ भूभुजा ।
इत्यष्टाङ्गनिमित्तज्ञः, स्पष्टमाचष्ट कश्चन ॥ ३२६ ॥
राजन् ! सौभाग्यमञ्जर्याः, स्वयंवरणमण्डपे ।
नूनं वलयापहर्त्ता, स्वयमेष्यति सत्पुमान् ॥ ३२७ ॥
रूपेणातिस्मरश्चैतां,स तत्र परिणेष्यति ।
हृष्टोऽथाऽमण्डयत्तस्याः, स्वयंवृतिमहं पिता ॥ ३२८ ॥
दूताहूताश्च बहवस्तत्रेयुः खेचरेश्वराः ।
महाबलाद्यानुगतो, रत्नपालोऽपि कौतुकात् ॥ ३२९ ॥
सुरूपान्सदलङ्कारांस्तत्रासीनान्नभश्चरान् ।
विलोकयन्ती प्रत्येकमेत्य सौभाग्यमञ्जरी ॥ ३३० ॥
वव्रे वीक्ष्य स्ववलयाङ्कितहस्तं नृपं तदा ।
जहृषुश्चोपलक्ष्यैनं, खेटा हेमाङ्गदादयः ॥ ३३१ ॥ युग्मम् ॥
अथान्ये खेचराः सर्वे, भूचरेण वृतामिमाम् ।
वीक्ष्य विध्यातवदना, अन्योऽन्यं व्यमृशन्निदम् ॥ ३३२ ॥
दोष्मतामियतां विद्याभृतां चेदद्य पश्यताम् ।
परिणेष्यत्ययं कन्यां, तज्जीवन्तोऽपि ते मृताः ॥ ३३३ ॥
ततस्ते स्वपराभूतिप्रोद्भूतप्रबलक्रुधः ।
ससैन्या योद्धुमुत्तस्थुः, सर्वे सन्नह्य सत्वरम् ॥ ३३४ ॥
महाबलैर्वल्लभाद्यैः, खेटवीरैर्वृतस्तदा ।
तद्दिव्यरसजातौजा, युध्यजय्यः सुरैरपि ॥ ३३५ ॥
शस्त्राशस्त्रि चिरं युद्ध्वा, रत्नपालः क्षमापतिः ।
हेलया तान् द्विषोऽजैषीत्कन्यामादातुमुद्यतान् ॥ ३३६ ॥

१. स्वकीय । 'पृष्टोऽसौ च' इत्यपि ।

नराणां निर्जराणां च, तदेत्यासन् गिरोऽभितः ।
सर्वानाश्चर्यमेकोऽपि, खेचरान्भूचरोऽभ्यभूत् ॥ ३३७ ॥
ताभिः पराभिभूताश्च, तेऽभूवन्दुःखिता भृशम् ।
उच्छ्वास्यमानाः शस्त्रीभिर्युधीव पतिता भटाः ॥ ३३८ ॥
रत्नपालोऽपि विद्वेषिजयश्रियमिवाङ्गिनीम् ।
सौभाग्यमञ्जरीं कन्यां, पाणौ चक्रे महामहैः ॥ ३३९ ॥
दत्ता हेमाङ्गदेनात्मप्राच्यप्रीत्या च भूरिशः ।
विद्याः प्रज्ञप्तिगौर्याद्याः, साधयामासिवान् नृपः ॥ ३४० ॥
वैताढ्यस्योभयोः श्रेण्योर्जित्वा सर्वनभश्चरान् ।
प्रावर्त्तयत्पुनः स्वाज्ञां, सिद्धविद्यः स भूमिभुग् ॥ ३४१ ॥
विविधप्राभृतश्रेणीसम्भृतश्रीस्ततोऽथ सः ।
ताभिः प्रियाभिस्तिसृभिः, सहितः सुहिताशयः ॥ ३४२ ॥
निषेव्यमाणो विद्याभृद्वीरैर्हेमाङ्गदादिभिः ।
दिव्यं विमानमारूढः, प्राप्तः स्वनगरं सुखम् ॥ ३४३ ॥
गजापहारादारभ्य, दुःखदाहार्दिताः प्रजाः ।
स्वदर्शनसुधावृष्ट्या, सद्योऽशीतलयच्च सः ॥ ३४४ ॥

## परिच्छेदस्तृतीयः

प्रतापतपनः प्राप्तं, प्राच्यपुण्यैः पचेलिमैः ।
निःसपत्नमथ प्राज्यं, राज्यं पालयतीति सः ॥ ३४५ ॥

अथ च —

कथामपूर्वामाश्चर्यभूतां यः कथयेत्पुमान् ।
तस्मै दत्ते सुवर्णानां, दश लक्षाः स निश्चितम् ॥ ३४६ ॥

दीनार्त्तदुःस्थानाथादीन्स्थूललक्षः[1] स लक्षशः ।
साधारयत्यनुदिनं, स्वर्णलक्षा ददद्दश ॥ ३४७॥
सम्यक् काव्यरसाऽभिज्ञः, स कूर्चालसरस्वती ।
दत्ते सत्काव्यकर्तृभ्यो, लक्षाश्चानुदिनं दश ॥ ३४८॥
सर्वत्र प्रसरत्कीर्त्तिः, कीर्त्तिदानोल्लसन्मतिः ।
द्वे स्वर्णलक्षे अर्थिभ्यो, विश्राणयति चान्वहम् ॥ ३४९॥
धर्मप्राप्तातुलैश्वर्यो, धर्मश्रद्धालुहृत्पुनः ।
[2]सप्तक्षेत्र्यां व्ययति, त्रिंशल्लक्षीं स सर्वदा ॥ ३५०॥
स्वान्तःपुरस्वाङ्ग[3]भोगपत्तिभृत्यनियोगिषु ।
गजाश्वादौ च तस्याष्टत्रिंशल्लक्षव्ययो ध्रुवम् ॥ ३५१॥
अमुष्य प्रत्यहं स्वर्णकोटी ह्येवं विलोक्यते ।
तेन दिव्यरसेनाशु, सापि सम्पद्यते सुखम् ॥ ३५२॥
इतश्च द्यूतकारोऽस्ति, तत्रैकः प्रत्यहं च सः ।
लक्षं जयति द्रम्माणां, पुनर्हारयति ध्रुवम् ॥ ३५३॥
द्रम्मत्र्यंशस्तु सन्ध्यायां, ध्रुवस्तस्यावशिष्यते ।
तन्मूल्येनाऽथ गोधूमपूपान्पचति स क्वचित् ॥ ३५४॥
गत्वा चण्डीगृहे चण्डीस्कन्धे न्यस्य पदौ च सः ।
प्रदीपतैलेनाऽभ्यज्य, तान्निःशूकोऽत्ति सर्वदा ॥ ३५५॥
इदानीमत्र यद्येति, जनः कश्चन कर्हिचित् ।
सर्वत्र विश्रुतं नूनं, मन्माहात्म्यमुपैति तत् ॥ ३५६॥
चिन्तयन्तीति सुचिरं, भृशं खेदमुपेयुषी ।
सा चण्डी कथमप्येनं, निवारयितुमिच्छति ॥ ३५७॥

---

१. 'दानशौण्डः'। २. "व्ययति त्रिंशतं लक्षाः, सप्तक्षेत्र्यां स सर्वदा ।" इत्यपि ।
३. 'स्वाङ्गस्वान्तःपुरीभोग' इत्यपि ।

तथा भक्षयति स्वैरं, तस्मिन्पूपानथाऽन्यदा ।
सा तं भापयितुमना, रसनां निरसीसरत् ॥ ३५८॥
चण्डि ! खाद त्वमप्येतत्पूपखण्डमिति ब्रुवन् ।
जिह्वायां सोऽमुचत्साऽपि, मायया तदभक्षयत् ॥ ३५९॥
जिह्वायां सुप्रलम्बायां, कर्षितायां पुनस्त्वया ।
रे चण्डि ! रण्डे ! लुब्धासीत्युक्त्वा तेनाऽथ थूत्कृतम् ॥ ३६०॥
रसनां थूत्कृतोच्छिष्टां, प्रक्षिपामि कथं मुखे ?।
इति ध्यात्वा तथैवास्थात्, सा विषण्णमनाः सुरी ॥ ३६१॥
तथा भीष्ममुखीं वीक्ष्य, चण्डीं प्रातरथो जनाः ।
अयमुत्पात उत्पन्नोऽनर्थायेत्यवदन्मिथः ॥ ३६२॥
शान्तिकादीन्यकार्यन्त, तैश्च तस्योपशान्तये ।
तथापि देवी रसनां, नोच्छिष्टेत्यक्षिपन्मुखे ॥ ३६३॥
शमयत्येनमुत्पातं, योऽथ स्वर्णशतं हि सः ।
लभतेऽद्य जनैरेवं, पटहोऽवाद्यताऽभितः ॥ ३६४॥
आत्मप्रत्यक्षमुत्पन्नं, तमुत्पातं विदंस्तदा ।
स धूर्त्तः पटहं स्पृष्ट्वा, सुवर्णशतमग्रहीत् ॥ ३६५॥
विजनं कारयित्वाऽथ, प्रविश्यान्तर्गृहं च सः ।
प्रौढं पाषाणमुद्यम्य, चण्डीं निष्ठुरमित्यवग् ॥ ३६६॥
रे चण्डि ! रण्डे ! रसनां, पश्चात्क्षिप मुखेऽधुना ।
नो चेदनेन भङ्क्ष्यामि, भवत्या नूनमाननम् ॥ ३६७॥
दुरात्मनोऽस्य नोद्धारः, कश्चित्पापेऽत्र कर्मणि ।
आत्महानिर्जने हास्यं, चेत्थं चेति भयेन सा ॥ ३६८॥

किमप्यनर्थमे[1]तस्मिन्निःशूके कर्त्तुमक्षमा ।
अनन्यगतिकत्वेन, तदा जिह्वां मुखेऽक्षिपत् ॥ ३६९ ॥ युग्मम् ॥
शान्तेऽथ तस्मिन्नुत्पाते, पौराः प्रमुदिताः समे ।
धूर्त्तश्च तद्धनं सर्वं, तस्मिन्नेवा[2]ऽह्न्यहारयत् ॥ ३७० ॥
यदुक्तम्—
*"द्विघटं ग्रहिला मूर्ध्नि, द्यूतकारकरे धनम् ।*
*हारश्च मर्कटीकण्ठे, कियद्वेलं हि तिष्ठति" ? ॥ 27 ॥*
तदनन्तरमप्येत्य, नक्तं चण्डीगृहे सदा ।
पूपानत्ति गताशङ्को, द्यूतकारस्तथैव सः ॥ ३७१ ॥
अथान्यदा किमप्यन्यन्निःशूके कर्त्तुमक्षमा ।
दूना दुर्विनयाच्चास्माद्धूर्त्ते तत्रागते निशि ॥ ३७२ ॥
चण्डी निष्काशयामास, दीपमेव स्ववेश्[3]मतः ।
तिष्ठ दीप ! क्व यासीति, वदन्पृष्ठेऽचलच्च सः ॥ ३७३ ॥ युग्मम् ॥
तदा देवीनियोगेन, दीपोऽवक् तमिति स्फुटम् ।
रुक्षानेवाद्धि रे! पूपांस्तैलं दास्ये न ते मनाग् ॥ ३७४ ॥
यास्याम्यब्धेः परतटं, पश्चाच्च वलसे न किम् ? ।
सोऽथाह तैलं लास्यामि, तत्राप्येत्य क्व यास्यसि ? ॥ ३७५ ॥
दीपोऽग्रे पृष्ठतो धूर्त्त, इति यान्तौ द्रुतं द्रुतम् ।
भास्करेऽभ्युदिते प्राप्तौ, दूराटव्यामुभावपि ॥ ३७६ ॥
तं तदा विप्रतार्यैवं, तत्र दीपस्तिरोहितः ।
क्षिप्तोऽहिवद् रिपुर्दूर-मिति हृष्टा च सा सुरी ॥ ३७७ ॥
हा ! देव्या वञ्चितोऽस्मीति, विषण्णोऽथ वने भ्रमन् ।
स धूर्त्तः प्रज्वलद्वह्निकुण्डस्य सविधे स्थितम् ॥ ३७८ ॥

---

१. 'र्थं तस्मिंश्च' इत्यपि । २. 'व दिनेऽव्ययत्' इत्यपि । ३. 'वेश्मनः' इत्यपि ।

अप्सरोजैत्रसौभाग्यं, प्रत्यग्रोल्लासि यौवनम् ।
कन्याद्वयं नरं चैकं, दृष्टवान् विकलाङ्गकम् ॥ ३७९ ॥ युग्मम् ॥
किमर्थं के युवामत्रेत्यादि पृष्टे च तेन ते ।
नोचतुस्ते परं किञ्चिद्व्यावृत्त्याऽगात्पुरेऽथ सः ॥ ३८० ॥
रत्नपालोऽत्र नृपतिस्तथ्यापूर्वाद्भुतां कथाम् ।
कथयित्रे सुवर्णानां, लक्षा दत्ते दश ध्रुवम् ॥ ३८१ ॥
इति ज्ञात्वा स राज्ञोऽथ, तद्वृत्तं सर्वमप्यवग् ।
कौतुकेन नृपः सद्यस्तत्र तेन सहागमत् ॥ ३८२ ॥
कृशानुकुण्डं किमिदं, दीनोऽयं कश्च के युवाम् ।
विश्वस्ते वदतं सम्यग्, रत्नपालोऽस्म्यहं नृपः ॥ ३८३ ॥
पृच्छतीत्थं नृपे तस्मिंस्तयोरेकाऽवदत्कनी ।
राजन् ! गन्धर्वराजस्य, नाम्ना विश्वावसोः सुते ॥ ३८४ ॥
देवसेना च गन्धर्वसेनेत्यावां हि विश्रुते ।
तारुण्यमाप्ते लावण्यकन्दोद्भेदाम्बुदं क्रमात् ॥ ३८५ ॥ युग्मम् ॥
तत्तन्मन्त्रघृताहुत्यादिभिर्दीप्तातुलाऽर्चिषि ।
स्तब्धुं शक्ये न केनापि, मन्त्रतन्त्रौषधीबलैः ॥ ३८६ ॥
यमास्यभीष्मे दिव्याग्नौ, यः स्नास्यति नरोत्तमः ।
भावी भर्त्ता भवत्पुत्र्योः, स नूनं सत्त्वसेवधिः ॥ ३८७ ॥ युग्मम् ॥
पैररजेयो भविता, भरतार्द्धाऽधिपश्च सः ।
इति दैवज्ञवाग्नुन्नः, पिता नौ मुक्तवानिह ॥ ३८८ ॥
सत्त्वाधिकं च तमभिज्ञातुं तेन स्वविद्यया ।
हीनसत्त्वैः सुदुष्प्रेक्ष्य[1]मग्निकुण्डमिदं कृतम् ॥ ३८९ ॥

---

१. 'सुदुष्प्रेक्ष,' इत्यपि ।

झम्पामिहाऽस्मल्लोभाच्च, ददत्कोऽप्येष **खेचरः** ।
संशयालुरभूद्देव्या, विकलाङ्गीकृतश्च तत् ॥ ३९० ॥
निराशोऽयं निरुत्साहः, स्वस्थानं वाऽथ यास्यति ।
सत्त्वादृते न सिद्धिर्यत्सर्वं सत्त्वे प्रतिष्ठितम् ॥ ३९१ ॥
कन्यावक्त्रादिति श्रुत्वा,सत्त्वाढ्यः सहसा नृपः ।
कुण्डे झम्पामदात्तच्च, सत्त्वेनाऽभूत्सुधामयम् ॥ ३९२ ॥
तत्र स्नानेन समभूद्राजा वज्रवपुः पुनः ।
अथागाज्ज्ञाततद्वृत्तस्तत्र विश्वावसुः खगः ॥ ३९३ ॥
रत्नपालनृपालेन, समं स्वसुतयोस्तयोः ।
हृष्टोऽथाचीकरत्पाणिग्रहणं स महामहैः ॥ ३९४ ॥
प्राप्तः प्रमुदितः पत्नीद्वयाप्त्या स्वपुरं नृपः ।
विंशतिं स्वर्णलक्षाश्च, तस्मै द्यूतकृते ददौ ॥ ३९५ ॥
आगच्छद्भिश्च गच्छद्भिरथान्यायार्जितैर्धनैः ।
कितवः प्रत्यहं योऽभूत्पूर्णो रिक्तः पुनः पुरा ॥ ३९६ ॥
नृपादासादितप्राज्यसुवर्णो न्यायवर्त्मना ।
सोऽप्यभूद्वर्द्धमानर्द्धिः, स्पष्टं न्यायफलं ह्यदः ॥ ३९७ ॥
तस्योत्तमचरित्रस्य, सोऽक्षधूर्त्तश्च भूभुजः।
परिचित्योपदेशैश्च, निर्वृत्तो व्यसनाध्वनः ॥ ३९८ ॥
निदाघेऽथान्यदा सिद्धसरित्स्रोतसि शीतले ।
विधित्सुः सलिलक्रीडां, नावमारूढवान्नृपः ॥ ३९९ ॥
प्रणुन्नाऽऽकस्मिकेनाऽथ, पृष्ठप्रबलवायुना ।
चचाल पूर्वाभिमुखं, वायुवेगेन मङ्गिनी[१] ॥ ४०० ॥

१. नौका ।

ग्रामारामादि निखिलं, चक्रारूढमिव भ्रमत् ।
तटयोरुभयोः पश्यत्यवनीशे सकौतुकम् ॥ ४०१ ॥
घटीद्वयेन पूर्वाब्धेस्तटं प्राप्याऽथ मङ्गिनी ।
सा स्वयं स्खलितेवास्थादुत्तीर्णश्च नृपस्तटम् ॥ ४०२ ॥ युग्मम् ॥
तत्रागत्य नरः कश्चिद्विनयेनावदच्च तम् ।
क्व प्राप्तः परदेशेऽहं, विषादमिति मा कृथाः ॥ ४०३ ॥
महानुभावस्य तवागमनेनात्र निश्चितम् ।
सर्वेषामपि यद्भावि, सर्वं सुन्दरमायतौ ॥ ४०४ ॥
नृपस्तदा तमित्याख्यत्सुदुर्लक्षामिहायतिम् ।
शकुनैः कैर्निमित्तैर्वा, सौम्य ! जानासि साम्प्रतम् ॥ ४०५ ॥
सत्यवादी सोऽप्यवादीद्वेद्मि कालं यथोत्तरम् ।
यथास्थितं हि तद्वृत्तं, शृणु सत्त्वनिधेऽधुना ॥ ४०६ ॥
पूर्वदेशं दशग्रामकोटियुक्तममुं नृपः ।
रत्नसेनो भुनक्त्यत्रासन्ने रत्नपुरे वसन् ॥ ४०७ ॥
एकादश महेभानामस्य लक्षा महौजसाम् ।
रथानां विंशतिर्लक्षा, लक्षाश्च दश वाजिनाम् ॥ ४०८ ॥
कोट्यश्च दश पत्तीनामित्याद्यस्त्यखिलं परम् ।
कर्मानुभावाद् हृन्नेत्रानन्दनो नास्ति नन्दनः ॥ ४०९ ॥
अथाऽस्य[1] चाऽभूत्कनकावलीराज्ञ्यां सुताद्वयम् ।
तत्राद्या कनकमञ्जर्यन्या च गुणमञ्जरी ॥ ४१० ॥
तयोरकस्मात्तारुण्ये, प्राच्यजन्मार्जितैरघैः ।
अथोदभूद्गलत्कुष्टमन्धता च यथाक्रमम् ॥ ४११ ॥

---

१. 'अस्याथ' इत्यपि ।

नानाशास्त्रविदो वैद्या, नृपादेशात्सहस्रशः ।
तयोरनेकैर्भैषज्यैश्चिकित्सां चक्रिरे चिरम् ॥ ४१२॥
मान्त्रिकाश्च तयोर्मन्त्रैस्तन्त्रैर्यन्त्रैश्च भूरिभिः ।
सप्रत्ययैः शुभोत्साहं, चक्रुर्नैकाः प्रतिक्रियाः ॥ ४१३॥
यथाम्नायं यतन्ते स्म, तत्रान्येऽपि सुभूरयः ।
तयोः कर्मानुभावेन, परं नाभून्मनाग्गुणः ॥ ४१४॥
मन्यमाने[1] मुधैवात्ममर्त्त्यजन्मामयार्दिते ।
ते दुःखान्मरणोन्मुख्यावथ जाते उभे अपि ॥ ४१५॥
तयोश्च निबिडस्नेहपाशबद्धहृदौ तदा ।
राजा राज्ञी च नियतं पृष्टतो मर्त्तुमिच्छतः ॥ ४१६॥
किंकर्त्तव्यतया मूढैर्गूढार्थैरथ मन्त्रिभिः ।
आराद्धा विविधाऽर्च्चाभी, राज्याधिष्ठायिनी सुरी ॥ ४१७॥
सर्वसाक्षिकमाकाशे, स्थित्वा सा स्पष्टमित्यवग् ।
रत्नपालः क्षितिपतिः, पुरात्पाटलिपुत्रकात् ॥ ४१८॥
नावारूढो मत्प्रयोगात्सद्योऽप्यत्र समेष्यति ।
महात्मा स च ते कन्ये, विधास्यति निरामये ॥ ४१९॥ युग्मम्॥
इति श्रुत्वा प्रमुदिता, हृदि सर्वे नृपादयः ।
विद्युद्विस्फूर्जितमिवादृश्याजनि च सा सुरी ॥ ४२०॥
देव्या तदत्रानीतोऽसि, कन्याव्याध्युपशान्तये ।
योजनानां पञ्चशती, त्वत्पुरं स्यादितः पुरात् ॥ ४२१॥
महर्द्ध्या मुदिता देव्या, गिरा ज्ञातत्वदागमाः ।
तव सम्मुखमायान्तो, नृपाद्याः सन्ति सम्प्रति ॥ ४२२॥

1. 'રોગથી પીડાયેલી, પોતાનો મનુષ્ય જન્મ નિષ્ફળ માનતી, તે બન્ને પણ દુઃખને કારણે મરણ માટે તત્પર થઈ' એમ શ્લોકાર્થ છે.

इति ब्रुवाण एवाऽस्मिंस्ते तत्रैत्यानमन्नृपम् ।
नगरं च नयन्ति स्म, विनयाद्विविधोत्सवैः ॥ ४२३॥
परोपकृतिनिष्णातो, नृपाद्यैरथ सोऽर्थितः ।
रोगाभिभूतं तत्कन्यायुग्मं कर्त्तुं निरामयम् ॥ ४२४॥
सर्वावसरोपयोगी, स्याद्वपुःपार्श्ववर्त्त्ययम् ।
इत्यङ्गदस्थे न्यस्तोऽभूत्, प्राक्क्रियाँल्लघुकुम्पके ॥ ४२५॥
भाले तेन रसेनाऽथ, स्पृष्टा तेन कृपालुना ।
आसेचनकरूपश्रीस्तत्राद्या समभूत्कनी ॥ ४२६॥
अञ्जिताऽक्षी च तेनैव, कनी सद्यः कनीयसी ।
दिवापि तारकालोकक्षमदृष्टिरजायत ॥ ४२७॥
गुणैः क्रीते ततः पुत्र्यौ, रत्नपालनृपाय ते ।
प्रदत्ते रत्नसेनेन, परिणीते च तेन ते ॥ ४२८॥
रत्नसेनोऽथ जामात्रे, तस्मै राज्यमदान्निजम् ।
स्वयं जग्राह प्रव्रज्यां, भवोद्विग्नमनाः पुनः ॥ ४२९॥
दिनानि कतिचित्तत्र, रत्नपालोऽपि सप्रियः ।
स्थित्वा तद्राज्यचिन्तायां, मूलामात्यान्नियुज्य च ॥ ४३०॥
पथि प्रौढोपदा[1]पाणिमिलन्नैकनृपार्चितः ।
बलैराकम्पयन्नुर्वीं, क्रमादेति निजं पुरम् ॥ ४३१॥
इतश्चाऽपहृते नावा, नृपे सामन्तमन्त्रिणः ।
व्यमृशन्निति सोद्वेगं, किंकर्त्तव्यजडा मिथः ॥ ४३२॥
सम्यक् स्वरूपं हा ! राज्ञो, ज्ञायते न शुभाशुभम् ।
तदद्यास्वामिकं राज्यं, रक्षणीयमिदं कथम्? ॥ ४३३॥

1. સુંદર ભેટણા છે હાથમાં જેને એવા મળી રહેલા અને રાજાઓથી પૂજાયેલ

प्रायो निःस्वामिकं राज्यं, सम्यग्रक्षाविधिं विना ।
दुष्टा द्विषोऽधितिष्ठेयुर्निर्जीवाङ्गमिवाऽमराः ॥ ४३४॥
महाभाग्यबलस्यास्य,राज्यं तावदिहास्तु वा ।
इदानीं पदयोरेवमस्माकं हि कृतज्ञता ॥ ४३५॥
सामन्तामात्यसांमत्यादिति सिंहासने चिरम् ।
निवेश्य नेमुर्निखिला, राजवर्ग्याः प्रभोः पदा ॥ ४३६॥
तस्मिन्सुराज्ञि राजन्या, दानसन्मानतोषिताः ।
न केचिदपि शून्येऽपि, राज्ये विघटितास्तदा ॥ ४३७॥
अथ दर्शनसोत्कण्ठा, अकुण्ठस्नेहसम्भ्रमाः ।
राज्ञ्यागच्छति ते सर्वे, सद्यः सम्मुखमाययुः ॥ ४३८॥
तान्सम्भाष्य यथौचित्यं, प्राविशत्स्वपुरेऽथ सः ।
दीनदुःस्थार्थिनो दानैः, प्रीणयन्परितः पथि ॥ ४३९॥
निजास्थानस[१]भां प्राप्य, सर्वाश्चानन्दयत्प्रजाः ।
उदयक्ष्माभृतश्चूडां, चक्रवाकीरिवार्यमा ॥ ४४०॥
स्नेहाच्च स्ववियोगाग्निप्रज्वलन्मनसश्चिरात् ।
सर्वा यथौचितालापैः, प्रेयसीरप्यपिप्रिणत् ॥ ४४१॥
शृङ्गारसुन्दरी शुद्धशीला १ रत्नवती २ तथा ।
पत्रवल्ली ३ मोहवल्ली ४, तथा सौभाग्यमञ्जरी ५ ॥ ४४२॥
देवसेना च ६ गन्धर्वसेना ७ कनकमञ्जरी ८।
गुणाच्च मञ्जरी ९ त[२]स्य, पट्टराज्यो नवाऽभवत् ॥ ४४३॥
ग्रामाणां स्वःसमृद्धीनां, विंशतिस्त[३]स्य कोटयः ।
सहस्रा रत्नयोनीनां, पत्तनानां च विंशतिः ॥ ४४४॥

१. 'सभामाप्य' इत्यपि । २. 'त्यस्य' इत्यपि । ३. 'तस्य विंशतिकोटयः' इत्यपि ।

वेलाकूलसहस्राणि, द्वादशैतस्य भूभुजः ।
दश द्वीपसहस्राणि तावन्तश्च किरीटिनः ॥ ४४५ ॥
चत्वारिंशत्पत्तिकोट्यास्त्रिशल्लक्षाश्च दन्तिनाम् ।
लक्षा रथानां चाऽश्वानां, चत्वारिंशच्च निश्चिताः ॥ ४४६ ॥
सहस्रा जलदुर्गाणां, पञ्चाऽन्येषां च ते दश ।
खेटाः सहस्रं सेवन्ते, तं च हेमाङ्गदादयः ॥ ४४७ ॥
दीनदुःस्थोद्धृतौ धर्मे, स्वाश्रितानां च पोषणे ।
तस्य राज्ञः प्रतिदिनं, स्वर्णकोटिव्ययो गृहे ॥ ४४८ ॥
यः प्राप्तः प्राक्तनैः पुण्यैस्तुम्बकस्थो महारसः ।
तेन तावदपि स्वर्णं, तस्य सम्पद्यते सदा ॥ ४४९ ॥
आधयो व्याधयः सप्तापीतयश्च प्रसृत्वराः ।
रसानुभावात्तद्राज्ये, प्रासरन्नहि कर्हिचित् ॥ ४५० ॥
रत्नपालस्य नृपतेरथ मेघरथादयः ।
क्रमेणासञ्शतं पुत्राः, संपत्राकृतशत्रवः[१] ॥ ४५१ ॥
खेलतोऽस्य सुखाम्भोधावीदृगैश्वर्यशालिनः ।
सुखं दशशरल्लक्षा, व्यतीयुर्वासरा इव ॥ ४५२ ॥
अथान्यदा पुरे तत्र, महासेनमहामुनिः ।
मूर्त्तो धर्म इव प्रापत्, पौरानुग्रहकाम्यया ॥ ४५३ ॥
तं मिथ्यात्वविषावेगविध्वंसिवचनामृतम् ।
श्रद्धालुमनसः पौरा, नैके वन्दितुमाययुः ॥ ४५४ ॥
रत्नपालोऽपि नृपतिः, सान्तःपुरपरिच्छदः ।
तं जङ्गमहातीर्थमुपासितुमुपागमत् ॥ ४५५ ॥

---

१. उन्मूलितशत्रवः ।

संसारापारकान्तारोत्तारणप्रतिभूर्नृणाम् ।
तदादिशन्मुनिश्रेष्ठो, धर्ममार्गमिति स्फुटम् ॥ ४५६ ॥

दुःखान्नित्यापतज्जन्मजरामृत्यामयादिनः ।
बिभ्यद्योऽत्यन्तसातोद्यं[1], यियासत्यचिरात्पदम् ॥ ४५७ ॥

संसारसागरोत्तारतरणिप्रभमादरात् ।
स सम्यगाराधयतादन्वहं धर्ममार्हतम् ॥ ४५८ ॥

स चाराद्धुं सुसाधः स्याज्जये सर्वान्तरद्विषाम् ।
आत्मैवाद्यो हि तेष्वेतज्जये यत्ते जिताः समे ॥ ४५९ ॥

यदुक्तम्—

*"एगे[2] जिए जिआ पंच, पंच जिए जिआ दस ।*
*दसहा उ जिणित्ताणं, सव्वसत्तू जिणामहं ॥ 28 ॥*
*एगप्पा[3] अजिए सत्तू, कसाया इन्दियाणि अ ।*
*ते जिणित्तु जहानायं, विहरामि अहं मुणी" ॥29 ॥* ( उत्तराध्ययन )

शतं सहस्त्रं लक्षं वा, ये जयन्ति युधि द्विषः ।
तेऽपि क्रूराशयाः शूरा, नात्मानं जेतुमीशते ॥ ४६० ॥

गुर्वीं कोटिशिलां दोर्भ्यां, हेलयैवोत्क्षिपन्ति ये ।
युद्धैकवीरास्तेऽप्यत्र, नात्मानं जेतुमीश्वराः ॥ ४६१ ॥

कुलीना वाग्मिनः सम्यक्, सर्वविद्याविदो हि ये ।
नियम्य स्वहिते योक्तुं, तैरप्यात्मा न शक्यते ॥ ४६२ ॥

यो धर्मं बोधयत्यात्मगिरा मर्त्यान् दशान्वहम् ।
स्वयं हि विषयान्भुङ्क्ते, नन्दिषेणमुनिस्तु सः ॥ ४६३ ॥

---

१. मोक्षरूपम् । २. "एकस्मिन् जिते जिताः पञ्च, पञ्चसु जितेषु जिता दश । दशधा तु जित्वा, सर्वशत्रून् जयाम्यहम्" ॥ इति च्छाया ॥ ३. "एकस्मिन् आत्मनि अजिते, कषाया इन्द्रियाणि च । ते जित्वा यथाज्ञातं, विहरामि अहं मुनिः" ॥ इति च्छाया ।

यदुक्तम्—

*"[१]दस दस दिवसे दिवसे, धम्मे बोहेइ अहव अहिअयरे ।*
*इय नंदिसेणसत्ती, तहवि अ से संजमविवत्ती" ॥30 ॥* ( उपदेशमाला )

तथा—

*"[२]पइदिवसं दसजणबोहगोऽवि सिरिवीरनाहसीसोऽवि ।*
*सेणिअसुओऽवि सत्तो, वेसाए नन्दिसेणमुणी" ॥ 31 ॥*

कश्चिद्दुष्टान् रिपूँल्लक्षं, युद्धे जयति दोर्बलात् ।
जयेदात्मानमेकं वा, तस्यायं परमो जयः ॥ ४६४ ॥

यदुक्तम्—

*"[३]जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे ।*
*एगं जिणिज्ज अप्पाणं, एस से परमो जओ" ॥32 ॥* ( उत्तराध्ययन )

दम्यन्ते हि सुखं नैकैरप्युन्मत्ता गजादयः ।
न तु शक्यो दमयितुं, कैरप्यात्मा निरङ्कुशः ॥ ४६५ ॥

यदुक्तम्—

"[४]खरकरहतुरयवसहा, मत्तगइंदावि नाम दम्मन्ति ।
इक्को नवरि न दम्मइ, निरंकुसो अप्पणो अप्पा" ॥33 ॥( उपदेशमाला )

संविग्नैर्यैश्च संसारोद्विग्नैरात्मा हि दम्यते ।
अत्रामुत्राऽपि सुखिनस्ते भवेयुर्यदुच्यते ॥ ४६६ ॥

---

१. "दश दश दिवसे दिवसे, धर्मे बोधयति अथवा अधिकतरान् । इति नन्दिषेणशक्तिः, तथापि च तस्य संयमविपत्तिः" ॥ इतिच्छाया । २. "प्रतिदिवसं दशजनबोधकोऽपि श्रीवीरनाथशिष्योऽपि । श्रेणिकसुतोऽपि सक्तो, वेश्यायां नन्दिषेणमुनिः" ॥ इति च्छाया ॥ ३. "यः सहस्रं सहस्राणां, संग्रामे दुर्जयान् जयेत् । एकं जयेत् आत्मानं, एष तस्य परमो जयः" ॥ इति च्छाया । ४. "खरकरभतुरगवृषभा, मत्तगजेन्द्रा अपि नाम दम्यन्ते" एको नवरं न दम्यते, निरङ्कुश आत्मन आत्मा" ॥ इति च्छाया ॥

"अप्पा[1] चेव दमेअव्वो, अप्पा हु खलु दुद्दमो ।
अप्पादन्तो सुही होइ, अस्सिं लोए परत्थ य" ॥34॥ ( उत्तराध्ययन-१ )
जितात्मता पुनर्लिङ्गैर्ज्ञायते न तु भाषितैः ।
सूर्योदयो हि प्रभया, लक्ष्यो न शपथव्रजैः ॥ ४६७ ॥

शमसंवेगनिर्वेदास्तिक्यमैत्रीदयादमैः ।
समत्वाममताद्यैश्च, ज्ञायते हि जितात्मता ॥ ४६८ ॥
अप्यनादिभवाभ्यस्ता, सांसारिकसुखस्पृहा ।
प्रायो नोत्पद्यते पुंसां, हृदि जातु जितात्मनाम् ॥ ४६९ ॥
यतन्ते च जितात्मानः, सर्वस्थाम्ना शुभाशयाः ।
सर्वज्ञोपज्ञसद्धर्मानुष्ठानेषु निरन्तरम् ॥ ४७० ॥
तस्माच्च[2] सदनुष्ठानोद्योगात्तीर्णभवार्णवाः ।
जितात्मानोऽचिरादेव, परमं पदमाप्नुयुः ॥ ४७१ ॥
दृष्टान्तश्चाऽत्र वो मुग्धभट्टपत्नी सुलक्षणा ।
विजित्यात्मानमचिरात्परं पदमुपेयुषी ॥ ४७२ ॥
तथाहि—
रम्यप्रदेशः कोशाम्बीपुर्यासन्नः समृद्धिमान् ।
शालिग्रामाभिधो ग्रामः, प्रसिद्धः समभूत्पुरा ॥ ४७३ ॥
आसीत्तत्र गुणोद्दामधाम दामोदरो द्विजः ।
शम्भोरिवोमा सोमाऽस्य,सती प्राणप्रिया पुनः ॥ ४७४ ॥
मुग्धस्वभावः समभून्मुग्धभट्टः सुतस्तयोः ।
स्नुषा च सत्कुलोत्पन्नान्वर्थसंज्ञा सुलक्षणा ॥ ४७५ ॥

१: "आत्मा एव दमतिव्य, आत्मैव खलु दुर्दमः ।
आत्मदान्तः सुखी भवति, अस्मिन् लोके परत्र च" ॥ इति च्छाया ।
२. 'यस्मात्' इत्यपि ।

मुग्धभट्टोऽन्यदा पित्रोः, परलोकमुपेयुषोः ।
देशान्तरेऽगाद्दारिद्र्यनुन्नो मुक्त्वा गृहे प्रियाम् ॥ ४७६ ॥
लघोर्वृद्धस्य चाऽभावात्सद्मन्येकाकिनी सती ।
बिभ्यत्यप्य[1]सदाचारकुलमालिन्यतो हि सा ॥ ४७७ ॥
लोलप्रकृतितारुण्योच्छृङ्खलं विषयान् स्मरत् ।
निरोद्धुं कथमप्यात्ममानसं नाशकत्तदा ॥ ४७८ ॥ युग्मम् ॥
महेभ्यपत्न्या कमलश्रियाऽथामलशीलया ।
समं मनोनिरोधार्थं, सा सख्यमतनोत्सती ॥ ४७९ ॥
तत्सद्मैत्य सदा स्नेहगोष्ठ्या व्याक्षिप्य सा पुनः ।
मनो निषिद्धाचरणाध्वनः किञ्चिन्निषिध्यति ॥ ४८० ॥
अन्येद्युस्तत्र विमला, गणिनी विमलाशया ।
एत्यास्थात्सपरीवारोपाश्रये कमलश्रियः ॥ ४८१ ॥
अदृष्टपूर्विणी साध्वीस्तत्रासाथ सुलक्षणा ।
ताः प्रेक्ष्य मौग्ध्यात्स्वसखीमित्यप्राक्षीत्सविस्मयम् ॥ ४८२ ॥
निःस्वामिका भ्रमन्त्येताः, किं सर्वत्र सखि ! क्षितौ ? ।
कुत्रासां पत्यपत्यादि, विद्यते च कुटुम्बकम् ॥ ४८३ ॥
मङ्गल्यभूषाभोगाङ्गैरशेषैरपि वर्जिताः ।
असंस्कृताङ्गनेपथ्याः, किञ्चैता मूर्ध्नि मुण्डिताः ॥ ४८४ ॥
कमलश्रीरिति प्रोचे, तां मुग्धप्रकृतिं तदा ।
एताः सखि ! महासत्यः, सत्यसंयमजीविताः ॥ ४८५ ॥
मङ्गल्यभूषाविमुखास्त्यक्तनिःशेषकल्मषाः ।
निष्कषायामलहृदस्तत्त्वार्थोपनिषद्विदः ॥ ४८६ ॥

---

१. 'बिभ्यत्यपि सदा' इत्यपि ।

अजिह्मब्रह्मनिरता, विरता लौकिकाध्वनः ।
सार्वोपदिष्टानुंष्ठानाऽवहिताः पिहिताश्रवाः ॥ ४८७ ॥
सर्वां स्वजातिमुद्धर्त्तुं, भवकूपे निपेतुषीम् ।
कृतार्था अपि कृपया, विहरन्त्यभितः क्षितौ ॥ ४८८ ॥

(चतुर्भिः कलापकम्)

मात्राद्यशेषसंसारसम्बन्धप्रतिबन्धमुक् ।
सर्वसावद्यविरतौ, लीनमासां मनश्चिरात् ॥ ४८९ ॥
राज्ञां दुहितरः काश्चित्काश्चिच्च व्यवहारिणाम् ।
एता विरक्ता भोगेभ्यो, निःसङ्गं धर्ममाश्रिताः ॥ ४९० ॥
गोत्रदेवीमिव श्रद्धावन्तश्च जननीमिव ।
सर्वेऽपि बहु मन्यन्ते, नृपेभ्याद्याः सदाप्यमूः ॥ ४९१ ॥
सखि ! सङ्गतिरप्यासां, परमार्थदृशां ध्रुवम् ।
जनैरपुण्यैर्दुष्प्रापा, शमसाम्यरसप्रपा ॥ ४९२ ॥
वन्दनाराधनाद्यासामास्तां निःशेषदुःखहृत् ।
एतत्पदरजोऽप्याशु, ललाटस्पृष्टमिष्टकृत् ॥ ४९३ ॥
इति सख्या गिरा ज्ञातसम्यक्साध्वीगुणाऽथ सा ।
सरलप्रकृतिश्चित्ते, दध्याविति सविस्मयम् ॥ ४९४ ॥
देशान्तरमिते पत्यौ, स्वल्पकालमपीह मे ।
सन्मार्गे न चलं चेतः, कथंचिदपि तिष्ठति ॥ ४९५ ॥
शीलं सर्वोपधाशुद्धं, पालयन्त्यः सदाप्यमूः ।
कथं नाम निरुन्धन्ति, तारुण्यतरलं मनः ? ॥ ४९६ ॥
मन्त्रः किमासां साम्नायः, कश्चिद्वा काचिदौषधी ? ।
सम्यग्गुरूपदिष्टोऽस्ति, कश्चिदन्योऽथवा विधिः ॥ ४९७ ॥

तत्पृच्छामि सकृत्साध्वीं, मनोरोधनिबन्धनम् ।
कुलस्त्रीणां हि सर्वत्र, सोपयोगं तदीक्ष्यते ॥ ४९८ ॥
गणिनीमथ साऽप्राक्षीदम्ब ! सम्यग् निवेद्यताम् ।
साध्व्यस्तरुण्यस्तरलं, रुन्धन्ति स्वमनः कथम् ? ॥ ४९९ ॥
साप्यूचे नव्यनव्योद्यत्सत्कृत्यव्यापृतात्मनाम् ।
असदध्वनि साध्वीनां, मनो जातु न गच्छति ॥ ५०० ॥
हस्तिनो मर्मनिहिते, सदा लीनं यथाऽङ्कुशे ।
मनो हि विन्ध्यानुध्यानं विधत्ते न हि कर्हिचित् ॥ ५०१ ॥
लीनं सदा सुसिद्धान्ताध्ययनाध्यापनादिषु ।
तथा मनोऽपि साध्वीनां, न जातु विषयान् स्मरेत् ॥ ५०२ ॥
यथा शृङ्खलितः कण्ठे, कपिरन्वेति योगिनम् ।
तथा चपलमप्यात्मव्यापारं नियतं मनः ॥ ५०३ ॥
अप्रशस्ते प्रशस्ते वा, व्यापारे नूनमात्मनः ।
प्रवर्तते मनो वाताध्वनि तूलमिवाम्बरे ॥ ५०४ ॥
आत्मा संयमयोगेषु, व्यापार्यः सद्भिरन्वहम् ।
तेषु प्रवृत्तं यद्याति, जातु नाऽसत्पथे मनः ॥ ५०५ ॥
*"पैशाचिकमाख्यानं, श्रुत्वा गोपायनं च कुलवध्वाः ।
संयमयोगैरात्मा, निरन्तरं व्यापृतः कार्यः" ॥ 35 ॥* (प्रशमरति)
सर्वतो देशतश्चापि, विशुद्धः संयमो भवेत् ।
सम्यक्त्वदार्ढ्ये नियतं, तत्स्वरूपमिदं पुनः ॥ ५०६ ॥
जीवादीन्नवतत्त्वार्थान्निसर्गाद्वोपदेशतः ।
सम्यग् यदङ्गी श्रद्धत्ते, तत्सम्यक्त्वमिहेष्यते ॥ ५०७ ॥
तत्र यः स्थिरधीः सर्वा, नित्यमावश्यकक्रियाः ।
सत्यापयेद्यथाकालं, सोऽचिरान्मुक्तिमाप्नुयात् ॥ ५०८ ॥

साध्व्याः सदुक्तिसन्दर्भादित्यादेरुपदेशतः ।
प्रपेदे लघुकर्मत्वात्सा सद्यो धर्ममार्हतम् ॥ ५०९ ॥
सम्यक् श्राद्धक्रियाः सर्वाः, साध्वीभिरथ शिक्षिताः ।
यथोक्तबलं सश्रद्धा, सत्यापयति सा सदा ॥ ५१० ॥
क्षयोपशमतो ज्ञानावरणीयस्य कर्मणः ।
साध्वीपार्श्वे प्रवचनप्रावीण्यं साऽभजत्क्रमात् ॥ ५११ ॥
मनस्ततः प्रभृत्यस्या, नव्यनव्यार्हकर्मसु ।
लीनं मीन इवाम्भस्सु, नाऽस्मार्षीद्विषयान्तरम् ॥ ५१२ ॥
अथ प्राप्तश्चिराद्गेहं, मुग्धभट्टोऽन्यदा प्रियाम् ।
अप्राक्षीत्सुभ्रु ! सुचिरं, मद्वियोगे कथं स्थिता ? ॥ ५१३ ॥
साप्यूचे नाथ ! सद्धर्मसततव्यापृतात्मना ।
मया मनसि नाज्ञायि, त्वद्वियोगव्यथा मनाक् ॥ ५१४ ॥
प्रिये ! स को हि सद्धर्मस्तेनेत्युक्ताऽवदच्च सा ।
ज्ञानश्रद्धानचारित्ररूपोऽसौ धर्म आर्हतः ॥ ५१५ ॥
यथावस्थिततत्त्वानां, सङ्क्षेपाद्विस्तरेण वा ।
योऽवबोधस्तमत्राहुः, सम्यग्ज्ञानं मनीषिणः ॥ ५१६ ॥
रुचिर्जिनोक्ततत्त्वेषु, सम्यक्श्रद्धानमुच्यते ।
जायते तन्निसर्गेण, गुरोरधिगमेन वा ॥ ५१७ ॥
सर्वसावद्ययोगानां, त्यागश्चारित्रमिष्यते ।
सर्वतो देशतश्चैतत्साधोः श्राद्धस्य च क्रमात् ॥ ५१८ ॥
इत्याद्युक्तस्तया सार्वोपज्ञधर्मः सविस्तरम् ।
सरलप्रकृतेश्चास्य, स भृशं रुरुचे हृदि ॥ ५१९ ॥
यदुक्तम्—

*"अज्ञः सुखमाराध्यः, सुखतरमाराध्यते विशेषज्ञः ।*
*ज्ञानलवदुर्विदग्धं, ब्रह्मापि नरं न रञ्जयति" ॥ 36 ॥* ( नीतिशतक-२ )

सर्वज्ञोपज्ञसद्धर्मे, सम्यक्परिणते हृदि ।
निश्चयश्रावकः सोऽभून्मुग्धभट्टः शनैः शनैः ॥ ५२० ॥
अथ भुञ्जानयोर्भोगान्मिथः स्निग्धहृदोस्तयोः ।
समयेऽजनि गार्हस्थ्याश्रमद्रुमफलं सुतः ॥ ५२१ ॥
सुतमारोप्य तं कट्यां, मुग्धभट्टोऽन्यदा प्रगे ।
शीतार्त्तो विप्रसङ्कीर्णां, धर्मार्थाग्निष्ठिकां[1] ययौ ॥ ५२२ ॥
आत्मधर्म्मं विमुच्याऽयं, श्राद्धोऽभूदित्यसूयया ।
सर्वतो मण्डलीभूय, तिष्ठन्तस्तत्र वाड़वाः ॥ ५२३ ॥
श्राद्धोऽसि हन्त[2] ! ते पापं, धर्मार्थाग्निष्ठिका ह्यसौ ।
अत्राऽऽगा मा महाभाग ! तव धर्मो नु दूष्यते ॥ ५२४ ॥
तदेत्याद्युपहासोक्तीर्जल्पन्तः कथमप्यमुम् ।
विदूषकप्रकृतयो, न हि तापयितुं ददुः ॥ ५२५ ॥ (त्रिभिर्विशेषकम्)
सोऽर्हद्धर्मोपहासेन, तेन खिन्नो भृशं तदा ।
समीचीनो यदि जिनोपज्ञधर्मः सनातनः ॥ ५२६ ॥
तदग्निपतितस्तिष्ठत्वक्षताङ्गो ह्यसौ शिशुः ।
असूनृतश्चाधुनिकश्चेत्तदस्त्वेष भस्मसात् ॥ ५२७ ॥
इति ब्रुवाणः सहसा, तत्र ज्वलति पावके ।
तमक्षैप्सीच्छिशुं हा ! हा !, विदधत्सु द्विजन्मसु ॥ ५२८ ॥

(त्रिभिर्विशेषकम्)

---

१. अङ्गारशकटीं ( अँगीठी ) । २. 'श्राद्धोऽसि ते महापापं' इत्यपि ।

अथाऽकस्मात्सदम्भोजसम्पुटे विधृतः शिशुः ।
सुर्या कयचित्सर्वज्ञमतोद्द्योतोद्यतात्मना ॥ ५२९ ॥
विराध्य गुरुकर्मत्वात्सा हि पाश्चात्यजन्मनि ।
श्रामण्यधर्मं समभूत्सामान्या व्यन्तरी सुरी ॥ ५३० ॥
तयाऽन्यदा च पृष्टोऽभूत्केवली भगवन्नहम् ।
सुप्रापबोधिर्नहि वेतीति सोऽप्यवदत्तदा ॥ ५३१ ॥
सुप्रापबोधिर्भवती, नूनमास्ते परं त्वया ।
यतनीयं विशेषेण, सम्यक्त्वोद्भावनाविधौ ॥ ५३२ ॥
ततः प्रभृत्यवधिना, वीक्षमाणा निरन्तरम् ।
ईदृक्कृत्येषु सर्वत्रावहिता तिष्ठति स्म सा ॥ ५३३ ॥
तया चालोक्य तं बालं, तयाम्भोजपुटे धृतम् ।
नैके द्विजादयोऽभूवन्मुक्ताऽसूया मतेऽर्हतः ॥ ५३४ ॥
मुग्धभट्टोऽपि हि प्राप्तः, सुतमादाय सद्मनि ।
सुलक्षणाया मुदितस्तद्वृत्तं सर्वमप्यवग् ॥ ५३५ ॥
साऽप्यवादीत्त्वया देवाऽविचारितमिदं कृतम् ।
सम्यक्त्वं किल तत्त्वार्थश्रद्धानं ह्युदितं जिनैः ॥ ५३६ ॥
येषां विशुद्धं तच्चास्ते, मिथःसाधर्मिकत्वतः ।
ते पक्षपातिनः प्रेत्यः[१], स्युश्च सुप्रापबोधिकाः ॥ ५३७ ॥
साधर्मिकेभ्यो ह्यधिकः, स्नेहो येषां सुतादिषु ।
सिद्धान्तनीत्या नियतं, तेषां सम्यक्त्वसंशयः ॥ ५३८ ॥
उपयुक्ता ततो बालं, काचिच्छासनदेवता ।
भवितव्यतयाऽरक्षत्सम्यक्त्वोद्भावनाकृते ॥ ५३९ ॥

१. 'प्रेक्ष्याः' इत्यपि ।

जात्वज्वलिष्यच्चेद्देव्यनवधाने परं शिशुः ।
तर्ह्यतथ्यश्चाधुनिकोऽभविष्यत्किं वृषो[1]ऽर्हतः ? ॥ ५४० ॥
यत्साधर्मिकसांनिध्यं, विनापीह निरन्तरम् ।
सम्यगेव निविष्टोऽर्हद्धर्मस्तत्त्वदृशां हृदि ॥ ५४१ ॥
श्रद्धानमेव सम्यक्त्वं, तत्त्वार्थानां हि वस्तुतः ।
चलाचलत्वे च हृदस्तदेव घटते कथम् ? ॥ ५४२ ॥
नूनं निश्चलधर्माणामीदृक् तद्बालचेष्टितम् ।
वि[2]मर्ष्टुमपि नो युक्तमास्तां तत्करणं पुनः ॥ ५४३ ॥
सुरासुरेन्द्रानुगतं, श्रीमन्तमजितप्रभुम् ।
कौशाम्ब्यां समवसृतं, निशम्यात्रान्तरे पुनः ॥ ५४४ ॥
मुग्धस्वभावं स्वपतिं, समयज्ञा सुलक्षणा ।
सम्यक्त्वधर्मे सुतरां, निश्चलीकर्त्तुमित्यवग् ॥ ५४५ ॥ युग्मम् ॥
आर्यपुत्र ! मदुक्तेऽत्र, प्रत्ययो हृदि ते न चेत् ।
तद्गत्वा पृच्छ कौशाम्ब्यां, सर्वज्ञमजितप्रभुम् ॥ ५४६ ॥
सम्यक् प्रत्येतुमथ तत्कौशाम्ब्यामेत्य सप्रियः ।
सोऽप्राक्षीत्तं पदैर्गूढैर्मन्वानः सर्ववेदिनम् ॥ ५४७ ॥
तत्किं स्वामिंस्तथेत्यत्र, भणत्येवमिति प्रभुः ।
द्विजेन कथमित्युक्तः, पुनराह जगद्गुरुः ॥ ५४८ ॥
श्रद्धानमेव सम्यक्त्वं, तत्त्वार्थानां यदुच्यते ।
मुग्धभट्टोऽथ सञ्जातप्रत्ययो मौनमाश्रितः ॥ ५४९ ॥
परोपकृतिधीराद्यगणभृत्त्रिजगद्गुरुम् ।
परिषत्प्रतिबोधार्थं, वन्दित्वाऽथेति पृष्टवान् ॥ ५५० ॥

---

१. धर्मः । २. विचारयितुम् ।

पृष्टं किमेतत्? किं चोक्तं?, स्वामिनाऽयं च को द्विजः ?।
सर्वं तदाऽवदत्सर्ववेदी वृत्तान्तमादितः ॥ ५५१ ॥
तं च वृत्तान्तमाकर्ण्य, प्रबुद्धा बहवोऽङ्गिनः ।
मुग्धभट्टश्च सम्यक्त्वे, स्थिरतामासदत्तमाम् ॥ ५५२ ॥
सप्रियः सोऽथ वैराग्यात्, प्राव्रजत्परमार्थदृग् ।
महानन्दपदं प्राप्तः, क्रमेणोत्पन्नकेवलः ॥ ५५३ ॥
भर्त्तुर्वियोगे ह्यात्मानं, विषयस्मरणोन्मुखम् ।
सम्यग् धर्मोपनिषदं, विदित्वा विमलामुखात् ॥ ५५४ ॥
वशीकृत्याऽर्हकृत्येषु, व्यापार्यैवं च सर्वदा[1] ।
सुलक्षणापि परमब्रह्मसम्पदमीयुषी ॥ ५५५ ॥ युग्मम् ॥
ततो भवभ्रमोद्विग्नैर्दुःखकर्मक्षयेच्छुभिः ।
यत्नः कार्योऽत्र भो भव्या!, जये सर्वात्मनात्मनः ॥ ५५६ ॥
धर्मतत्त्वं वदत्येवं, सदस्याः सर्ववेदिनि ।
प्रबोधमापुर्बहवः, पद्मानीवारुणोदये ॥ ५५७ ॥
अत्रान्तरे नृपश्रेष्ठो, ललाटघटिताऽञ्जलिः ।
इति ज्ञानिनमप्राक्षीद्विपाकं प्राच्यकर्मणाम् ॥ ५५८ ॥
प्राज्यं राज्यं क्रमायातं, स्वामिन् ! मम महौजसः ।
जग्राह कर्मणा केन, जयामात्याऽधमस्तदा ? ॥ ५५९ ॥
कर्मणा केन च तदा, सती शृङ्गारसुन्दरी ।
बिडम्बनाः कृतास्तेन, सहते स्म सुदुःसहाः ॥ ५६० ॥
प्राच्यसत्कर्मणः कस्य, प्रसादेन मया पुनः ।
चटत्प्रकर्षाच्चैश्वर्यलक्ष्मीरियमवाप्यत ॥ ५६१ ॥

१. 'नित्यशः' इत्यपि ।

कुष्ठं कनकमञ्जर्याः, केनासीत् कर्मणा पुनः ? ।
अन्धता गुणमञ्जर्याः, केन चाऽभूद्गुणस्तयोः ? ॥ ५६२॥
देवानामपि दुष्प्रापः, सम्प्राप्तोऽयं महारसः।
कर्मणा केन च मया?, स्वामिन् ! सर्वमिदं वद ॥ ५६३॥
अथ सत्केवलालोकाऽऽलोकिताखिलविष्टपः।
नृपप्रष्टं मुनिश्रेष्ठः, स्पष्टमाचष्ट पर्षदि ॥ ५६४॥

## परिच्छेदश्चतुर्थः

तथाहि—

इहैव भरतक्षेत्रे,पुरा रत्नपुरे पुरे ।
सङ्ग्रामवीरः समभूद्रत्नवीरः क्षमापतिः ॥ ५६५॥
श्रीदेवीप्रमुखाः पापविमुखाः कुशलोन्मुखाः ।
वल्लभा विनयौचित्यविदस्तस्याऽभवन्नव ॥ ५६६॥
तत्र चाजन्मदारिद्र्यदुःखदग्धाशयावुभौ ।
अभूतां सिद्धदत्तश्च, धनदत्तश्च वाणिजौ ॥ ५६७॥
बहूपक्रान्तमेताभ्यामर्जनाय श्रियः परम् ।
न सम्पन्नाः क्वचित्सा यल्लक्ष्मीः कर्मानुसारिणीः ॥ ५६८॥
अथान्यदा तयोस्तुल्यदुःखयोर्भविता कथम् ?।
निर्वाहो नौ सनिश्वासमिति वार्त्तयतोर्मिथः ॥ ५६९॥
सत्पुमान् कश्चिदित्याख्यदाशासिद्ध्यभिधा सुरी ।
लङ्घनैर्नूनमाराद्धा, दारिद्र्यं वां दलिष्यति ॥ ५७०॥ युग्मम्
तद्वचःप्रत्ययात्ताभ्यामथ स्वेष्टार्थसिद्धये ।
एकाग्रभावेनाराद्धा, विंशत्या लङ्घनैर्हि सा ॥ ५७१॥
प्रत्यक्षीभूय साऽप्यूचे, देयं लभ्यं च किन्तु नः ।
एवं यदेत्य मद्गेहे,लङ्घथः साम्प्रतं युवाम् ॥ ५७२॥

तदाहतुस्तौ विनयाद्देयं लभ्यं च नाऽत्र नौ ।
दारिद्र्यदूनौ त्वद्यावां[1], त्वामम्ब! शरणं श्रितौ ॥ ५७३॥
मातुरङ्कमामण्ड्य, यथेष्टं याचते शिशुः ।
सा तस्मै च मुदा दद्याद्देयं लभ्यं च तत्र किम्? ॥ ५७४॥
[१]स्वेष्टं त्वत्तोऽम्ब ! लङ्घित्वा, मार्गयावस्तथाऽधुना ।
नूनं स्वापत्ययोस्तच्च, वत्सलत्वेन दास्यसि ॥ ५७५॥
इत्युक्तिहृष्टा साऽप्याख्यद्वत्सौ ! लक्ष्मीविवेकयोः ।
याच्यमन्यतरद्वस्तु, न दास्ये युवयोर्द्वयम् ॥ ५७६॥
सिद्धदत्तस्तदा लुब्धमनाः कर्मानुसारिधीः ।
अयाचिष्टेहलोकार्थमात्रार्थी परमां रमाम् ॥ ५७७॥
कर्मानुभावात्सुमतिः, स्वल्पलोभः शुभायतिः ।
विवेकं धनदत्तश्च, प्रार्थयामास तां सुरीम् ॥ ५७८॥
याद्दशं यस्य सत्तायां, वेद्यं कर्म शुभाऽशुभम् ।
उत्पद्यते मतिस्तस्य, ताद्दशी हि शुभाशुभा ॥ ५७९॥
यदुक्तम्—
*"यथा यथा पूर्वकृतस्य कर्मणः, फलं निधानस्थमिवोपतिष्ठते।*
*तथा तथा तत्प्रतिपादनोद्यता, प्रदीपहस्तेव मतिः प्रवर्त्तते" ॥37॥*
अथार्थितं तयोर्देवी, प्रतिपद्य तिरोहिता ।
स्वस्वसद्मैत्य मुदितौ, चक्रतुस्तौ च पारणम् ॥ ५८०॥
देवीवरप्रणुन्नोऽथ, कश्चिन्मध्यन्दिनेऽन्यदा ।
योगी समागात्साम्नायः, सिद्धदत्तस्य सद्मनि ॥ ५८१॥
बाढमावर्जितस्तेन, तथ्यैरातिथ्यकर्मभिः ।
तस्मै स त्रपुषीबीजान्यार्पिपत्स च योगिराट् ॥ ५८२॥

1. तु अद्य आवां આ પ્રમાણે સંધિ વિગ્રહ. १. 'मातस्त्वादिष्टं लङ्घित्वा' इत्यपि ।

भावितानि मयैतानि, सिद्धमन्त्रेण सादरम्[1] ।
तद्वत्स! विधिनोप्तानि, रोहन्त्येतानि तत्क्षणम् ॥ ५८३ ॥
वल्लीवितानः स्तृणुते, घटीयुग्मेन मण्डपम् ।
जायन्ते परितस्तत्र, तत्कालं च फलान्यपि ॥ ५८४ ॥
व्यधुश्चैतान्यनाहार्यमाधुर्येण सुधामधः ।
एतैरास्वाद्यमानैश्च, क्षुत्तृट्पीडा प्रशाम्यति ॥ ५८५ ॥
सन्निपाताः समे वाताः, सर्वे रोगाश्च चक्षुषः ।
कुष्ठान्यष्टादशाप्याशु, शाम्यन्त्यास्वादितैश्च तैः ॥ ५८६ ॥
इत्युक्त्वा च गतो योगी, सिद्धदत्तोऽथ सद्मनि ।
तानि बीजानि कतिचिद्वाटके विधिनौप्तवान् ॥ ५८७ ॥
तत्कालमुद्गता वल्यो, विस्तृताश्चाशु मण्डपे ।
फलिताश्च फलैराप्तवाणी नहि मृषा क्वचित् ॥ ५८८ ॥
शतं सहस्रं लक्षं वा, समर्प्यास्मादथादरात् ।
तानि गृह्णन्ति धनिनो, दुष्टव्याधिभिरर्दिताः ॥ ५८९ ॥
रोगार्दितेभ्यो लोभेन, धनैस्तैः स्वैरमाहृतैः ।
सिद्धदत्तोऽथ समभूद्धनवानचिरादपि ॥ ५९० ॥
अथ तस्य गृहे वित्तमवर्धिष्ट यथा यथा ।
हृदीव स्पर्द्धया लोभो, वर्धते स्म तथा तथा ॥ ५९१ ॥
यथा लाभस्तथा लोभो, वर्धते ह्यधिकाधिकः ।
न रैकोट्याऽपि यत्तृप्तो, द्विमाषाऽर्थी पुरा द्विजः ॥ ५९२ ॥

1. 'भूरिशः' इत्यपि ।

तथा चोक्तं सिद्धान्ते—

*"जहा[1] लाहो तहा लोहो, लाहा लोहो पवड्ढई ।*
*दोमासकणयकज्जं, कोडीएऽवि न निट्ठिअं" ॥ 38 ॥*

(उत्तराध्ययनसूत्र)

अन्यत्राप्युक्तम्—

*"तृष्णाखानिरगाधेयं, दुष्पूरा केन पूर्यते ।*
*या महद्भिरपि क्षिप्तैः, पूरणैरेव खन्यते ॥ 39 ॥"*

ततो लोभाभिभूतात्मा, सिद्धदत्तोऽन्यदा निशि ।
यामे प्रबुद्धः पाश्चात्ये, चिन्तयामास चेतसि ॥ ५९३ ॥
मच्चित्तेष्टं कथं वित्तं, लाभैर्मेलिष्यतीदृशैः ।
घटा नूनमवश्यायैर्भ्रियन्ते नहि कुत्रचित् ॥ ५९४ ॥
तदनर्गलवित्ताप्त्यै, पोते गच्छामि साम्प्रतम् ।
अश्वैः पोतैरश्मभिर्वा, यल्लक्ष्मीरतिशायिनी ॥ ५९५ ॥
इति चित्ते स निश्चित्य, वित्तार्थी प्रातरुत्थितः ।
परद्वीपोचितैः पण्यैर्वहनं भृतवान् द्रुतम् ॥ ५९६ ॥
अथाऽस्य विमलो बाल्यवयस्यः शस्यवाग्मनाः[1] ।
पारिणामिकधीरास्ते, स तदा हि तमित्यवग् ॥ ५९७ ॥
आस्तां दूरे धनं बन्धो !, त्यागभोगप्रवर्त्तकम् ।
पुरा भोजनमप्येकदिनस्यासीन्न ते गृहे ॥ ५९८ ॥
साम्प्रतं तव सम्पन्नं, यदि पुण्यैरियद्धनम् ।
प्राणान्तकष्टे तत्पोते, किं लोभाद्व्रजसि स्वयम् ? ॥ ५९९ ॥
पोते प्राणान्तकष्टेऽपि, यान्ति युक्तं हि दुर्गताः ।
यतस्ते हृदि मन्यन्ते, दारिद्र्यान्मरणं सुखम् ॥ ६०० ॥

---

१. "यथा लाभस्तथा लोभो, लाभाल्लोभः प्रवर्धते ।
द्विमाषकनककार्यं, कोट्याऽपि न निष्ठितम्" ॥ इति च्छाया ।

1. 'વખાણવા લાયક છે વાણી અને મન જેનું એવો'

यदुक्तम्—

*"उत्तिष्ठ क्षणमेकमुद्वह सखे ! दारिद्र्यभारं मम,*
*श्रान्तस्तावदहं चिराच्च शरणं सेवे त्वदीयं सुखम् ।*
*इत्युक्तो धनवर्जितेन सहसा गत्वा श्मशानं शवो,*
*दारिद्र्यान्मरणं परं सुखमिति ज्ञात्वा स तूष्णीं स्थितः"* ॥ 40 ॥

चिकीर्षवः स्वनिर्वाहं, सुखैर्दुःखैर्यथो तथा ।
आदायाऽपरवित्तानि, यान्तु पोते बुभुक्षिताः ॥ ६०१ ॥
व्याप्रियन्ते तु धनिनो, येऽत्र संक्लेशकर्मसु ।
भोगत्यागवियुक्तास्ते, दैवकर्मकृतो ध्रुवम् ॥ ६०२ ॥
शास्त्रे सुधीभिरुदरं, नूनं दुष्पूरमुच्यते ।
तुष्येदिष्टान्नभुक्तौ तु, तदपि प्रहरद्वयम् ॥ ६०३ ॥
असंख्यैः स्वर्णरत्नाद्यैराहारैश्चातिपेशलैः ।
मनस्तु लुब्धप्रकृति, क्षणं जातु न तुष्यति ॥ ६०४ ॥
सद्मान्यसंख्याः स्युः प्रौढाश्चेन्मणिस्वर्णराशयः ।
तथापि तुष्टिः पुष्टिर्वा, पुंसामेवाशनादिभिः ॥ ६०५ ॥
तन्निर्वाहोचिते वित्ते, क्लिश्यन्ते[१] किं मुधा जडाः ? ।
अप्यद्भुतधनावाप्तौ, लोभस्यान्तो हि न क्वचित् ॥ ६०६ ॥

यदुक्तम्—

*"धनहीनः शतमेकं, सहस्रं शतवानपि ।*
*सहस्राधिपतिर्लक्षं, कोटिं लक्षेश्वरोऽपि च* ॥ 41 ॥
*कोटीश्वरो नरेन्द्रत्वं, नरेन्द्रश्चक्रवर्त्तिताम् ।*
*चक्रवर्त्ती च देवत्वं, देवोऽपीन्द्रत्वमिच्छति* ॥ 42 ॥

---

१. 'मूर्खाः क्लिश्यन्ति किं मुधा' इत्यपि ।

*इन्द्रत्वेऽपि हि सम्प्राप्ते, यदीच्छा न निवर्त्तते ।*
*मूले लघीयांस्तल्लोभः, शराव इव वर्द्धते" ॥43॥*

(योगशास्त्र प्र. ४)

महीयसाऽपि लाभेन, लोभो न परिभूयते ।
जीयेत मात्राहीनेन, मात्रासमधिकः कथम्? ॥ ६०७॥
अतिलोभो नृणां नूनं, महानर्थाय जायते ।
अकाण्डे श्रेष्ठिनः शृङ्गदत्तस्याऽभूद्यथा पुरा ॥ ६०८॥
स शृङ्गदत्तो गदितः, कोऽतिलोभनिदर्शनम् ।
सिद्धदत्तेनेति पृष्टस्तद्वृत्तं सोऽखिलं जगौ ॥ ६०९॥
तथाहि—
नगरे रोहणे नानापुंरत्नोत्पत्तिरोहणे ।
समभूच्छृङ्गदत्ताख्यो, व्यवहारी महाधनः ॥ ६१०॥
उत्तमाखिललोकेऽत्र, नीलीवन्मलिनात्मकम् ।
हर्त्तुं दृग्दोषममुकं, मन्ये विधिरवासयत् ॥ ६११॥
द्वात्रिंशत्स्वर्णकोटीशोऽप्यन्वहं स गतत्रपः ।
लोभाभिभूतः सामान्यकृत्यानि सृजति स्वयम् ॥ ६१२॥
वयस्थाः सन्तिः चत्वारस्तनया विनयान्विताः ।
चतस्रस्तस्य तारुण्यभरमाप्ताः स्नुषाः पुनः ॥ ६१३॥
स व्यवहारिकाचारद्रविणव्ययभीरुहृत् ।
गृहे दत्ते तु न स्थातुं, किञ्चित्कार्यमिषात्सुतान् ॥ ६१४॥
चैत्ये पौषधशालायां, विवाहे च चतुष्पथे ।
नैति वित्तव्ययाद्बिभ्यत्समुदाये च स क्वचित् ॥ ६१५॥
मा विक्षत्कोऽपि भिक्षार्थी, मत्सद्मेति भयेन सः ।
द्वारे कपाटद्वितयं, दत्ते तत्राऽर्गलां पुनः ॥ ६१६॥

मार्गणानां मार्गयतां, दत्ते गालीः स निष्ठुराः ।
प्रसह्याऽन्तः प्रविशतां, तेषां च गलहस्तकम् ॥ ६१७॥
सदापि हृदि वित्तार्थचिन्तार्त्तो विलिखन् भुवम् ।
कपोलहस्तकं दत्ते, स श्लथीभूतकन्धरः ॥ ६१८॥
इति प्रायः प्रतिदिनं, षड् दानानि ददात्ययम् ।
तथाप्यदाता प्रथितो, यशः पुण्यैरवाप्यते ॥ ६१९॥
द्वारे प्रवेष्टुं कार्प्पण्यान्नित्यं द्वास्थ इवार्थिनाम् ।
[1]स्नुषाश्चाऽसूयया जातु, निःसर्तुं न ददाति सः ॥ ६२०॥
नृपचौरनिधीशानां, कोशाध्यक्षोऽत्र निर्ममे ।
वेधसा कृपणो दातृगुणाभिव्यक्तये ध्रुवम् ॥ ६२१॥
यदुक्तम्—
*"विना कदर्यं दातापि, नाऽभविष्यत्प्रसिद्धिमान् ।*
*निशां विना कथं नाम, वासरोऽयमितीष्यते?" ॥ 44॥*
म्लेच्छगेहमिवाऽस्पृश्यं, त्याज्यं चण्डालकूपवत् ।
रथ्यानीरवदश्लाध्यं, तत्सद्माभूच्छनैः शनैः ॥ ६२२॥
यत उक्तम्—
*"किंशुके किं शुकः कुर्यात्, फलितेऽपि बुभुक्षितः ।*
*अदातरि समृद्धेऽपि, विदधत्यर्थिनः किमु?" ॥ 45॥*
यौवनोच्छृङ्खलास्तत्र,काराक्षिप्ता इवाथ ताः ।
कालं नयन्ति कष्टेन, मिथः सख्यजुषः स्नुषाः ॥ ६२३॥
तं वीक्ष्य श्रेष्ठिनं द्वारे, मूर्त्तं पापमिवान्यदा ।
व्योमाध्वनागात्प्रच्छन्नं, सद्मान्तः कापि योगिनी ॥ ६२४॥

---

१. 'स्नुषाणां चेर्ष्यया' इत्यपि ।

अकस्मादागतां तत्र, तामालोक्य ससम्भ्रमम् ।
उत्तस्थुः सम्मुखं सर्वास्ताः स्नुषाः प्रोचिरे च ताम् ॥ ६२५ ॥
किं पाश्चात्यभवाऽरातिः, श्वशुरः स मृतोऽद्य नः ? ।
यदस्मत्सुकृताकृष्टा, मातरन्तरिहागमः ॥ ६२६ ॥
सगर्वं साप्यवग् वत्सा !, नानामन्त्रौषधीविदाम् ।
न नः किमपि दुस्साधं, दुर्गमं च जगत्यपि ॥ ६२७ ॥
कलाकौटिल्यकुशलामथ तामाकलय्य ताः ।
प्रीणयित्वा बहुविधातिथ्यैरिति बभाषिरे ॥ ६२८ ॥
मातराशैशवादत्र, क्षिप्ताः कारागृहे वयम् ।
साम्प्रतं शरणं प्राप्ता, भवतीमादियोगिनीम् ॥ ६२९ ॥
विचित्राऽऽश्चर्यविपुलां, विपुलां[1] कथमप्यमूम् ।
प्रसीद दर्शयास्माकं, तत्कलाकुशलेऽधुना ॥ ६३० ॥
एभिः सभक्तिवचनैर्भृशमानन्दिताऽथ सा ।
दत्ते स्म तासां साधारां, विद्यां गगनगामिनीम् ॥ ६३१ ॥
ततश्चित्ते प्रमुदिताश्छुटिता इव बन्धनात् ।
चतस्रोऽपि हि ता वध्वः, सर्वाभरणभूषिताः ॥ ६३२ ॥
वाटकस्थं महत्काष्ठमारुह्य शुषिरं शनैः ।
सद्मसर्वजने सुप्ते, स्वर्णद्वीपे ययुर्निशि ॥ ६३३ ॥ युग्मम् ॥
विविक्तेऽथ क्वचित्स्थाने, तत्र काष्ठं विमुच्य ताः ।
सुरक्रीडापुरस्यान्तर्विविशुः कौतुकोत्सुकाः ॥ ६३४ ॥
तत्र च स्फारशृङ्गारानिन्द्रादीन् क्रीडतः सुरान् ।
नृत्यं चाप्सरसां रम्यं, स्वेच्छया ता व्यलोकयन् ॥ ६३५ ॥

1. पृथ्वी

काष्ठं तदेव चारुह्य, निशान्त्यप्रहरे रहः ।
स्वसद्मैत्य यथास्थानं, सुषुपुस्ताः सकैतवाः ॥ ६३६ ॥
यौवनेनोद्धताः स्वेच्छाविहाराभिरताश्च ताः ।
एवं केनाऽपि( प्य )विदिताः, गच्छन्त्यायान्ति चानिशम् ॥६३७॥
यैः स्वबुद्ध्याम्बुधेरम्बु, प्रमातुं पार्यते पलैः ।
स्त्रीचरित्रं हि गहनं,न सम्यग् बुध्यतेऽपि तैः ॥ ६३८ ॥
यदुक्तम्—

*"अश्वप्लुतं माधवगर्जितं च, स्त्रीणां चरित्रं भवितव्यतां च ।*
*अवर्षणं चापि च वर्षणं च, देवा न जानन्ति कुतो मनुष्याः ?"॥46॥*
*प्राप्तुं पारमपारस्य, पारावारस्य पार्यते ।*
*स्त्रीणां प्रकृतिवक्राणां, दुश्चरित्रस्य नो पुनः ॥ 47 ॥*

(योगशास्त्र प्र. २-८५)

*"[१]विहिविलसिआण खलभासिआण तह कूडमहिलचरिआण।*
*मणवंछिआण पारं, जाणइ जइ होइ सव्वन्नू" ॥ 48 ॥*

अथान्यदा श्रेष्ठिनोऽस्य,भुजिष्यः[1] कुशलाभिधः ।
सुमहत्काष्ठमन्योऽन्यस्थाने नित्यमवेक्ष्य तत् ॥ ६३९ ॥
को न्वियच्चालयत्येतद्वीक्षेऽद्येति विचिन्त्य सः ।
निशीक्षमाणो निभृतं, वधूवृत्तमबुद्ध तत् ॥ ६४० ॥ युग्मम् ॥
सदैवैताः क्व यान्तीति?, जिज्ञासुः स च कौतुकी ।
प्रच्छन्नः प्राक् प्रविश्याऽस्थाद्रात्रौ तत्काष्ठकोटरे ॥ ६४१ ॥
प्रागवत्तत्काष्ठमारुह्य, तन्निश्यपि नभोऽध्वना ।
विहृत्य स्वेच्छया स्वर्णद्वीपतो गृहमाययुः ॥ ६४२ ॥

---

१. "विधिविलसितानां खलभाषितानां तथा कूटमहिलाचरितानाम् ।
मनोवाञ्छितानां पारं, जानाति यदि भवति सर्वज्ञः" ॥ इति च्छाया ।

1. नोकर

प्रच्छन्नः सोऽपि तद्वृत्तं, सर्वं ज्ञात्वा यथास्थितम् ।
लात्वा स्वर्णेष्टकायुग्मं,तथैवागत्य सुप्तवान् ॥ ६४३॥
तासां तेनाऽत्यसंभाव्यचरित्रेण चमत्कृतः ।
एवं च चिन्तयामास, स चित्ते चतुरश्चिरम् ॥ ६४४॥
नारी यदबला मुग्धा, मधुरं चोच्यते विषम् ।
तन्मन्ये वैपरीत्योत्थलक्षणाया निदर्शनम् ॥ ६४५॥
मुग्धाभिरपि नारीभिर्वञ्च्यन्ते हि विचक्षणाः ।
अबलाभिरपि क्षिप्रं, जीयन्ते च महौजसः ॥ ६४६॥
रक्षतीतीर्ष्यया श्रेष्ठी, द्वारस्थः सर्वदाप्यमूः ।
स्वैरं विहृत्य सर्वत्राऽऽयान्ति त्वेताः स्वविद्यया ॥ ६४७॥
उच्छृङ्खलत्वे मनसः, स्त्रीणां दुष्टात्मनां ततः ।
व्यर्थो रक्षाविधिर्बाह्यो, लोकेऽपीति यदुच्यते ॥ ६४८॥
*"मनो निबद्धं न स्त्रीणां, किं बद्धो मूढ! कम्बलः ।*
*तासां स्वेच्छाप्रवृत्तौ हि, किं कुर्यात्कम्बलो बलम्?"* ॥ 49 ॥
महाकविभिरित्युक्तम्—
*"कल्लोलैः सह पांशुखेलनतया लोलेयमित्याशया-*
*देकस्तम्भसरोजसौधकुहरे सिन्धोः सुता शौरिणा।*
*यन्न्यस्ताऽपि पितामहप्रहरके हा! नित्यमिन्दोः,*
*करैर्निर्यात्यर्ककरैरुपैति च नमो नारीचरित्राय तत्"* ॥ 50 ॥
तन्नारीरसदाचाराऽध्वनो नूनं निवर्त्तयेत् ।
कुलमेवार्गलीभूयाऽथवा दुर्गतिदुःखभीः ॥ ६४९॥
जागरित्वेति स चिरं, सुप्तः स्वर्णाप्तिगर्वितः ।
शब्दितः श्रेष्ठिनाप्येत्य, प्रातर्नोत्तरमप्यदात् ॥ ६५०॥

प्राक् स्वयं बुध्यते काले, वादितो वक्ति च द्रुतम् ।
किं जागर्ति न वाऽद्यायं ?, जाग्रद् वा किं न जल्पति ? ॥६५१॥
गर्वितस्तत्किमद्यायं ?, किञ्चिन्नव्यधनान्वितः ।
उच्चावचवचोभिर्वा, किं केनाप्येष रोषितः ? ॥ ६५२॥
रोगार्त्तः किमु वेत्यादि, निर्णिनीषुः स दाम्भिकः ।
स्वहस्तेन तमुत्थाप्य, साश्रुदृष्टिस्तदेत्यवग् ॥ ६५३॥
त्वं मे चतुर्णां पुत्राणां, स्नेहपात्रं हि पञ्चमः ।
तदद्यानीदृश इवालोक्यसे वत्स ! किं वद ?॥ ६५४॥
तैः स्नेहवचनैरार्द्रीभूतहृच्छ्रेष्ठिनेऽथ सः ।
निखिलं तद्वधूवृत्तं, यथादृष्टमवोचत[१] ॥ ६५५॥
निशम्य तदसंभाव्यं, स्वयमीक्षितुमुत्सुकः ।
तं वासरं शरत्प्रायं, तदा श्रेष्ठी ह्यमन्यत ॥ ६५६॥
आसन्नमरणः सोऽथ, कपटी तद्भुजिष्यवत् ।
निशि प्रविश्य प्रच्छन्नं, तस्थौ तत्काष्ठकोटरे ॥ ६५७॥
तन्निश्यपि स्नुषाः प्राग्वत्तदारुह्य नभोऽध्वना ।
स्वर्णद्वीपे ययुः काष्ठं, मुक्त्वा च विविशुः पुरे ॥ ६५८॥
श्रेष्ठी लोभाभिभूतश्च, तदा निर्गत्य कोटरात् ।
स्वर्णेष्टकाभिर्नैकाभिरभार्षीत् कोटरं हि तत् ॥ ६५९॥
लब्धद्रव्यागमोपायहृष्टस्तत्कोणके क्वचित् ।
वध्वागमनवेलायां, निलीयास्थाच्च पूर्ववत् ॥ ६६०॥
कृतार्थास्तावदागत्य, तदारुह्य च सत्वराः ।
अब्धेरुपरि ता व्योम्नि, चेलुः स्वनगरं प्रति ॥ ६६१॥
तत्काष्ठं पथ्यभूत्तासां, भूरिभारात्सुदुर्वहम् ।
ततो भानूदयाऽऽसत्त्या, विषण्णास्ता मिथोऽवदन् ॥ ६६२॥

---

१. मचीकथत् इत्यपि ।

मुच्यतेऽद्य स्वसः! काष्ठमेतद्दुर्वहमम्बुधौ ।
आदास्यते श्वः सुवहं, काष्ठमन्यत् पुनर्लघु ॥ ६६३॥
कोटरस्थस्तदा श्रेष्ठी, तन्निशम्य वचः स्नुषाः ।
मामज्ञात्वाऽत्र मध्यस्थमेतन्मा क्षेप्सुरम्बुधौ ॥ ६६४॥
इति बिभ्यन्मनाः प्रोचे, मध्येऽहं श्वशुरोऽस्मि वः ।
तत्काष्ठमेतज्जलधौ, स्नुषा मा मुचताऽधुना ॥ ६६५॥ युग्मम्॥
तं ज्ञात्वा काष्ठमध्यस्थं, मनसि क्षुभिता भृशम् ।
बुद्ध्यैवं पारिणामिक्या, व्यमृशन्नथ ता मिथः ॥ ६६६॥
सम्यग्ज्ञातात्मदुर्वृत्तो, जीवन्नद्य गतो गृहम् ।
नूनं शुभाय भविता, दुरात्मा नायमात्मनाम् ॥ ६६७॥
स सर्पघटवत्क्षिप्रं, तदयं क्षिप्यतेऽम्बुधौ ।
ईदृग् विलोक्यमानो हि, न प्राप्योऽवसरः परः ॥ ६६८॥
ततः प्रक्षिप्य तं तत्र, स्वं दुष्कर्मेव मूर्त्तिमत् ।
आसंस्ताः सुखिताः स्वेच्छत्यागभोगैश्चिरं गृहे ॥ ६६९॥
संगृह्य भूयसीः स्वर्णेष्टका लोभेन भूयसा ।
द्वात्रिंशत्स्वर्णकोटीशो, यथा भ्रष्टः स्वजन्मनः ॥ ६७०॥
प्राणान्तकष्टे तत्पोते, भूरिलोभाच्चटंस्तथा ।
अप्यपत्यधनायुर्भ्यः, कर्हिचिन्मित्र! मा भ्रशः ॥ ६७१॥
तवासप्तमसन्तानभोग्यमास्ते धनं गृहे ।
हा! कष्टं कष्टमीदृक्षं, तत्किमाद्रियसेऽधुना? ॥ ६७२॥
सुखं निषण्णः स्वगृहे, वित्तैर्वित्तमुपार्जयन् ।
त्यागभोगैर्निजं जन्म, कृतार्थय महाशय ! ॥ ६७३॥
मित्रेणैवं बहूक्तोऽयं, नानादृष्टान्तयुक्तिभिः ।
परं विवेकवैकल्यात्किञ्चिन्नाऽमंस्त तद्धितम् ॥ ६७४॥

अथातितृष्णातरलः, कृतकौतुकमङ्गलः ।
पोतमारुह्य जलधौ, स ययौ मन्दिरे क्वचित् ॥ ६७५॥
व्यवहृत्य चिरं तत्र, प्राप्तातुलधनश्च सः ।
ववले सपरीवारस्तथैव स्वपुरं प्रति ॥ ६७६॥
तस्मिन्नीप्सितलाभाप्त्या, हृष्टेऽथायाति वर्त्मनि ।
दुर्दैवनुन्नैर्दुर्वातैरकस्मादब्धिरक्षुभत् ॥ ६७७॥
लोला अकस्मात्कल्लोलाः, करालाकृतयस्तदा ।
श्मशान इव वेतालास्तत्रोत्तस्थुः पदे पदे ॥ ६७८॥
पोतस्तैरुत्पतन्नुच्चैः, सद्यः स्वर्गं व्रजन्निव ।
मर्त्यैरतर्कि निपतन्, पातालं प्रविशन् पुनः ॥ ६७९॥
सिद्धदत्तादिभिस्त्यक्तजीविताशैस्तदा द्रुतम् ।
क्षिप्तं पोतं लघूकर्त्तुं, पण्यं निःशेषमम्बुधौ ॥ ६८०॥
लघूभूतोऽथ तत्पोतो, वायुनोत्पाट्य तूलवत् ।
भवितव्यतया शून्यद्वीपे क्वचिदनीयत ॥ ६८१॥
तत्तटं प्राप्य सञ्जातजीविताशाः प्रमोदिनः ।
सिद्धदत्तादयः सर्वे,तदा तत्रोदतारिषुः ॥ ६८२॥
भोज्ये क्षीणे स्वलोकानां, निर्वाहार्थमथोप्तवान् ।
तानि त्रपुष्या बीजानि, सिद्धदत्तस्तटक्षितौ ॥ ६८३॥
तत्कालमुद्गता वल्ल्यः, प्रवृद्धाः फलिताश्च ताः ।
स्वादयन्तः फलान्यासां, सुखिनश्चाऽभवज्जनाः ॥ ६८४॥
निर्गत्याथान्यदाऽम्भोधेस्तत्रैका जलमानुषी ।
आगमद्बिभ्यती तानि, फलान्यत्तुं शनैः शनैः ॥ ६८५॥
पाणावादाय पोतस्थं, रत्नमेकं प्रदर्शयन् ।
तां फलान्यदतीं धूर्त्तः, सिद्धदत्तो निषिद्धवान् ॥ ६८६॥

तद्देवीवरमाहात्म्यात्साप्यजानादिति स्फुटम् ।
मर्त्योऽयमीदृग्रत्नानि, फलमूल्यं हि याचते ॥ ६८७॥
ततः प्रविश्य चाम्भोधौ, गृहीत्वा विविधान् मणीन् ।
तत्रैत्य फललोभेन, सिद्धदत्ताय सार्पिपत् ॥ ६८८॥
तस्यै फलानि तावन्ति, तदा तानि स दत्तवान् ।
फलान्यस्यै ददात्येवं, रत्नान्यादाय सोऽन्वहम् ॥ ६८९॥
एवं क्रमेण विश्वासादन्योऽन्यैर्जलमानुषैः ।
तस्मै तत्फलमूल्येन, मणयः कोटिशोऽर्पिताः ॥ ६९०॥
मेलितैर्मणिभिर्भृत्वा, तं पोतमथ भूरिभिः ।
मुदितः स्वपुरं प्राप, सिद्धदत्तः शुभेन सः ॥ ६९१॥
कोटिशो वीक्ष्य रत्नानि, रत्नवीरेण भूभुजा ।
अथाऽऽज्ञा लुब्धचित्तेन, तत्पोते त्वरितं ददे ॥ ६९२॥
मया मत्वा तृणं प्राणानवगाह्य महार्णवम् ।
हा ! कष्टेनार्जिता लक्ष्मीरियमद्यागमद्वृथा ॥ ६९३॥
चेन्माता तु विषं दत्ते, विक्रीणाति[1] पिता सुतम् ।
राजा हरति सर्वस्वं, का नु तत्र प्रतिक्रिया? ॥ ६९४॥
त्रुटिताशं मनस्येवं, सिद्धदत्ते विषीदति ।
दिने त्रयोदशेऽथाज्ञां, स्वयमेवाऽमुचन्नृपः ॥ ६९५॥
सिद्धदत्तस्ततो हृष्टः, पोतादुत्तार्य तान्मणीन् ।
विक्रीय चासीत् षट्षष्टिस्वर्णकोटीश्वरः पुरे ॥ ६९६॥
निर्विवेकस्तु मिलति, क्वचिन्नैष महाजने ।
स्वलक्ष्मीगर्वितश्चैतं, तृणायापि न मन्यते ॥ ६९७॥
[2]नापि व्यययति क्वापि, धर्मे काणकपर्द्दिकाम् ।
तनुते स्वजनादीनामपि नोपकृतिं मनाक् ॥ ६९८ ॥

१. 'विक्रीणीते' इति स्यात् । २. 'क्वचिद्व्ययति धर्मादौ, नापि' इत्यपि ।

न महत्यर्हतो जातु, गुरूंश्चापि न वन्दते ।
वित्तैकचित्तः पशुवत्, स्वजनुर्गमयत्यसौ ॥ ६९९ ॥
स क्रमान्निर्विवेकत्वाद्विमुक्तो विनयादिभिः ।
द्वेष्यो महाजनस्याऽभूदक्षिपट्ट इवान्वहम् ॥ ७०० ॥
देवीवरानुभावेनोत्पन्नाऽमलविवेकधीः ।
त्रिसन्ध्यं धनदत्तस्तु,पूजयत्यर्हतः सदा ॥ ७०१ ॥
स धर्म्मं सद्गुरोः सम्यक्, श्रद्धालुः शृणुतेऽन्वहम् ।
महाकार्येऽपि न समं, केनचित्कलहायते ॥ ७०२ ॥
प्राणातिपाताद्विरतो, न मृषा जातु भाषते ।
वित्तं नाऽदत्तमादत्ते, स परस्त्रीपराङ्मुखः ॥ ७०३ ॥
दूरं त्यजति सप्तापि, व्यसनानि विशुद्धहृत् ।
महाजनान्तः स मिलंस्तदुक्तं तनुतेऽखिलम् ॥ ७०४ ॥
दयालुर्दीनदुःस्थादौ, परोपकृतिकर्मठः ।
सोऽल्पवित्तोऽप्युदात्तात्मा, पात्रे दत्ते यथोचितम् ॥ ७०५ ॥
परकार्यैककुशलः, परर्द्धि[1]ष्वमत्सरी ।
स्वजनुः सदनुष्ठानैस्तनुते स फलेग्रहि ॥ ७०६ ॥
सम्यग्विवेकाविर्भावोल्लसितैर्विनयादिभिः ।
अन्यैरपि गुणैश्चासीदिष्टः शिष्टजनेषु सः ॥ ७०७ ॥
अथान्यदा पुरे तत्र, कश्चिद्वैदेशिको वणिग् ।
असाध्यव्याधिना ग्रस्तो, निशि शून्यमठे मृतः ॥ ७०८ ॥
तत्संस्काराय मिलितः, सर्वस्तत्र महाजनः ।
धनदत्तोऽपि तत्राऽगाद्विवेकोद्दिष्टसत्पथः ॥ ७०९ ॥
निर्विवेकधनोन्मादविस्मृतात्मा तु तत्र सः ।
सिद्धदत्तो हि न प्राप्तस्तेनात्याकारितो बहु ॥ ७१० ॥

---

१. 'वृद्धि इत्यपि ।

श्मशानेऽथ तमादाय, प्राप्तः सर्वो महाजनः ।
न त्वज्ञातकुलस्यास्य, कश्चिद्दत्ते हुताशनम् ॥ ७११ ॥
विमृश्याऽथ मिथोऽवादीद्, धनदत्तं महाजनः ।
सौम्य ! त्वमस्मदादेशादस्य संस्कारमातनु ॥ ७१२ ॥
महाजनं विदन् क्ष्मापमिवाऽनुल्लङ्घ्यशासनम् ।
धनदत्तोऽनुमेने[1] तत्, तदा तद्वचनं सुधीः ॥ ७१३ ॥
निश्चिन्तो धनदत्तेन, तत्कार्यप्रतिपत्तितः ।
महाजनस्तु सकलो, दूरे गत्वा निषेदिवान् ॥ ७१४ ॥
शवं चितायां प्रक्षिप्य, सोऽपाकुर्वन्नथांऽशुकम् ।
ग्रन्थौ निबद्धमैक्षिष्ट, तत्कट्यां रत्नपञ्चकम् ॥ ७१५ ॥
आत्मसाक्ष्यपि तद्वीक्ष्य, नादत्तं ग्राह्यमुत्तमैः ।
इति हार्दविवेकेन, नाग्रहीष्ट स निःस्पृहः ॥ ७१६ ॥
पञ्चाप्यऽदर्शयत्तानि स त्वाकार्य महाजनम् ।
तदा तमाख्यत्सोऽप्येवं, तन्निर्लोभत्वविस्मितः ॥ ७१७ ॥
त्वमेवैतान्यनर्घ्याणि, गृहाण वचनेन नः ।
नाऽदत्तादानदोषस्ते, नूनमित्थं लगिष्यति ॥ ७१८ ॥ युग्मम् ॥
अनाथमीदृग् भूभर्तृस बधि निखिलं धनम् ।
इत्याविर्भूतसद्बुद्धिर्नाऽग्रहीष्ट तथापि सः ॥ ७१९ ॥
उक्त्वाऽथ वृत्तं तद्राज्ञे, ददौ तानि महाजनः ।
तन्निर्लोभत्वहृष्टश्च, धनदत्ताय सोऽप्यदात् ॥ ७२० ॥
ततः क्ष्मापार्पितान्येष, सुधीस्तान्यग्रहीन्मुदा ।
विक्रीणीते स्म पञ्चापि, स्वर्णलक्षैश्च पञ्चभिः ॥ ७२१ ॥

---

१. 'ऽनुमेनानः' इत्यपि ।

यच्छुभं सुदिनं कुर्यात्, प्राच्यपुण्योपढौकितम् ।
न हि माता पिता भ्राता, सुहृत्स्वामी च तन्नृणाम् ॥ ७२२॥
दुष्कर्मोपस्थितं घोरं, यत्कुर्याच्चादिनं नृणाम् ।
विरूपं व्यालवैतालादयो रुष्टा न जातु तत् ॥ ७२३॥
प्रसरेत्काश्चिदा( द )प्यब्धिः, काश्चिच्चाऽपसरेत्तिथीः ।
दिनादिनकृतस्तत्र, विशेषो वीक्ष्यते स्फुटः ॥ ७२४॥
चीयते विधुरेकत्र, पक्षेऽन्यत्र च हीयते ।
दिनादिनफलं देवेष्वपीदं का कथा नृणाम् ? ॥ ७२५॥
व्यापारव्यवसायादि, किञ्चित्कार्यं ततो महत् ।
सुधीश्चिकीर्षुः स्वदिनादिने पूर्वं परीक्षते ॥ ७२६॥
विमृश्यैवमथ प्रौढव्यवसायचिकीरसौ ।
स्वदिनादिनवीक्षार्थमजां प्रथमतोऽग्रहीत् ॥ ७२७॥
अल्पवृष्टौ यथा ह्यल्पमात्रः पङ्कोऽपि जायते ।
अल्पाहाराऽशने नूनमल्पैवाऽपि विसूचिका ॥ ७२८॥
अल्पैव हि वपुष्पीडाप्यल्पौच्चात्पतने पुनः ।
अल्पव्यवहृतौ चाल्पा, हानिरप्यदिने तथा ॥ ७२९॥
चरणाय बहिर्मुक्ता, सा तेनाऽथ गलस्तनी ।
तस्मिन्नेव दिने जग्धा, वराकी च वृकेण सा ॥ ७३०॥
क्रीत्वा क्रीत्वा बहिर्मुक्ता, तेनेत्थं त्रिदिनीमजा ।
परं नैकापि सन्ध्यायां, पश्चादागात्तदौकसि ॥ ७३१॥
ततो दिनं न मे सम्प्रत्येवं निश्चित्य चेतसि ।
तदा किमपि नारेभे, व्यवसायं स धीनिधिः ॥ ७३२॥
कियत्यथ गते काले, पुनस्तेन गलस्तनी ।
क्रीत्वा प्राग्वद्बहिर्मुक्ता, सुषुवे युगलं च सा ॥ ७३३॥

एवं दिनपरीक्षार्थी, यां यां गृह्णात्यजामयम् ।
सा सा प्रसूयतेऽस्यैवमजावृन्दमजायत ॥ ७३४॥
ततोऽधुना मे दिवसो, नूनमस्तीति निर्णयात् ।
प्राप्तश्चतुष्पथे प्रातः, स प्रौढव्यवसायधीः ॥ ७३५॥
तदैवं पञ्चभिः स्वर्णलक्षैः क्रीतं क्रयाणकम् ।
दूरदेशान्तरायातसार्थात्तेन मनस्विना ॥ ७३६॥
सर्वं तच्चार्पितं पोतवणिजां दिवसैस्त्रिभिः ।
सुवर्णलक्षाः पञ्चाशंस्तत्र लाभेऽस्य निर्मलाः ॥ ७३७॥
लाभजातोद्यमश्चैवं,सुधीर्व्यवहरन्नयम् ।
क्रमाद्द्वादशकोटीशो, लाभकर्मोदयादभूत् ॥ ७३८॥
परं यथा यथा वित्तं, वर्द्धते स्म तथा तथा ।
हृदि सम्यग् विवेकोऽस्य, स्पर्द्धयेवाधिकाऽधिकः ॥ ७३९॥
महेभ्यौ तौ सिद्धदत्तधनदत्तावथान्यदा ।
भोजनाय गृहे यान्तौ, व्यवहृत्यं चतुष्पथात् ॥ ७४०॥
राजाद्यसुतमन्येन, राजपुत्रेण केनचित् ।
भृशं विवादं कुर्वाणं, क्वचिद्ददृशतुः पथि ॥ ७४१॥ युग्मम्॥
विज्ञैर्न पार्श्वे गन्तव्यं, द्वयोर्विवदमानयोः ।
विवेकदृष्ट्या वीक्ष्यैवं, धनदत्तोऽन्यतो ययौ ॥ ७४२॥
विवेकविकलः सिद्धदत्तस्तु कलिकौतुकी ।
तत्राप्तः सुमनुष्यत्वात्ताभ्यां साक्षीकृतः कलौ ॥ ७४३॥
तदैव कलिभङ्गाय, साहंकारौ समत्सरौ ।
तं साक्षिणं सहादाय, तौ प्राप्तौ नृपपर्षदि ॥ ७४४॥
न्यायाऽन्यायं तयोः पृष्टस्तदा साक्षी स भूभुजा ।
सोऽन्यायं निर्विवेकत्वाच्चाऽख्यद्राजाऽङ्गजन्मनः ॥ ७४५॥

हृदि खिन्नो व्यवस्थायां, तदा संस्थाप्य तौ नृपः ।
दिनैः कतिपयैरन्यत्किञ्चिदुद्भाव्य दूषणम् ॥ ७४६ ॥
विंशतिं सिद्धदत्तेभ्यं, स्वर्णकोटीरदण्डयत् ।
महाजनोऽपि चोपेक्षां, द्वेष्यत्वात्तस्य निर्ममे ॥ ७४७ ॥ युग्मम् ॥
लावण्यलीलाललितौ, रूपसौभाग्यशालिनौ ।
सदलङ्कृतिनेपथ्यौ, ताविभ्यावथ चान्यदा ॥ ७४८ ॥
राजवर्त्मनि गच्छन्तौ, मन्त्रिपत्न्या रतिश्रिया ।
स्मरापस्मारवशतः, साऽनुरागं विलोकितौ ॥ ७४९ ॥
रूपसौभाग्यसौन्दर्यैः, शिल्पसीमेव वेधसः ।
ताभ्यामपि गवाक्षस्था, युवती ददृशे च सा ॥ ७५० ॥
जानानस्तन्महापापं, धनदत्तस्ततस्तदा ।
इवार्कबिम्बात्त्वरितं, दृशं संहृत्य जग्मिवान् ॥ ७५१ ॥
सिद्धदत्तस्त्वदान्तात्मा, निर्विवेकमनाः पुनः ।
तामेव वलितग्रीवं, पश्यंस्तत्र स्थितश्चिरम् ॥ ७५२ ॥
अकस्मात्तावदाप्तेन, पुरारक्षेण तत्र सः ।
इङ्गिताकारकुशलेनाऽऽबध्य क्ष्माभुजा( जेऽ )र्पितः ॥ ७५३ ॥
कियन्त्यहान्यथ क्षिप्त्वा, कारागारे नृपोऽपि तम् ।
समृद्धत्वाद्दश स्वर्णकोटीरादाय मुक्तवान् ॥ ७५४ ॥
नात्तं दत्तं तयोर्नैकेनापि नूनं तथाऽप्यभूत् ।
हा ! विवेकाऽविवेकाभ्यामिति भेदः पुनर्द्वयोः ॥ ७५५ ॥
धनदत्तं रहश्चौरः, कश्चिदेत्याऽथ चान्यदा ।
सपादकोटीमूल्यानि, दश रत्नान्यदीदृशत् ॥ ७५६ ॥

दशाप्येतानि गृह्णीष्व, देहि मह्यं पुनर्द्रुतम् ।
दश द्रम्मसहस्त्राणि, श्रेष्ठिन्नित्यवदच्च सः ॥ ७५७॥

नूनं स्तैन्याहृतान्येतान्यन्यथा कथमर्पयेत् ।
इत्थमत्यल्पमूल्येनाऽनल्पमूल्यान्यमूल्ययम् ॥ ७५८॥

नूनं स्तैन्यापवादाय, क्रीतं स्तैन्याहृतं सताम् ।
सप्तप्रकारः कुशलैश्चौरः शास्त्रे यदुच्यते ॥ ७५९॥

तदुक्तम्—

*"चौर १ श्चौरापको २ मन्त्री, ३ भेदज्ञः ४ काणकक्रयी ५ ।*
*अन्नदः ६ स्थानदश्चैव, ७ चौरः सप्तविधः स्मृतः" ॥ 51 ॥*

धनदत्तो विमृश्यैवं, विवेकविकसन्मतिः ।
निरुध्य लोभप्रसरं, तानि रत्नानि नाऽग्रहीत् ॥ ७६०॥

सिद्धदत्तं ततश्चौरस्तानि सोऽदीद्दशद्रहः ।
स च लोभाभिभूतात्मा, हृष्टस्तान्यग्रहीद् ध्रुवम् ॥ ७६१॥

पूर्णपापघटश्चौरः सोऽथ लोप्त्रकरो[1]ऽन्यदा ।
चटितो नगरारक्षहस्ते नश्यन्नितस्ततः॥ ७६२॥

कशाभिर्निर्दयं निघ्नंस्तं चौरमथ सोऽब्रवीत् ।
प्रांच्यं लोप्त्रं हि निःशेषं, क्वास्तीति वद रे! स्फुटम् ॥ ७६३॥

ताड्यमानः कशाघातैस्तदा तेन स तस्करः ।
यदभूद्यत्र तन्नामस्थानाभ्यां सर्वमब्रवीत् ॥ ७६४॥

प्राच्यचौर्यगतानेकवस्तुप्राप्तिप्रमोदभाग् ।
अधिकाऽधिकवित्तार्थी, पुरारक्षोऽवदत्पुनः ॥ ७६५॥

रत्नानि क्ष्माभुजः कोशाद्यान्यात्तानि त्वया पुरा ।
तानि रे! क्वातः स तदा, कम्पमानः पुनर्जगौ ॥ ७६६॥

---

1. ચોરીનો માલ હાથમાં છે જેને એવો.

तानि प्राग् धनदत्ताय, दर्शितानि मया रहः ।
नाऽगृह्णत्स त्वहं सिद्धदत्तायार्प्पितवांस्ततः ॥ ७६७॥
पुरारक्षोऽथ तद्वृत्तं, सर्वं राज्ञे न्यवेदयत् ।
सोऽतीव कुपितः स्तैन्याहृतरत्नक्रयात्तदा ॥ ७६८॥
सिद्धदत्तेभ्यमाकार्य, सद्यो गुप्तिगृहेऽक्षिपत् ।
सर्वथा चाऽन्नपानीयनिषेधं तस्य निर्ममे ॥ ७६९॥ युग्मम्॥
धनाढ्यतायामप्यागात्कार्येऽन्येषां नहि क्वचित् ।
कष्टे तस्येत्यनिष्टस्योपेक्षां पौरा व्यधुः पुनः ॥ ७७०॥
दिनैः कतिपयैः सोऽथ, बाध्यमानः क्षुधादिभिः[1] ।
क्ष्माभुजे सद्मसर्वस्वं, समर्प्य स्वममूमुचत् ॥ ७७१॥
सद्मासः सोऽथ तद्रिक्तं, धनधान्यादिवस्तुभिः ।
इष्टाङ्गमिव निर्जीवं, वीक्ष्याऽभूद्गुरुदुःखभाग् ॥ ७७२॥
दध्यौ पुनर्मनस्येवमियत्कालं ममौकसि ।
देवीप्रसादात्कमला, समागात्सर्वतोमुखी ॥ ७७३॥
त्यागभोगवियुक्तस्य, मुक्तस्य स्वजनादिभिः ।
निर्विवेकस्य मे सम्प्रत्येवमेवागमच्च सा ॥ ७७४॥
ऐहिकामुष्मिकौचित्यकृत्येषु श्रीर्ममौकसि ।
सोपयोगा क्वचिन्नाभूदटव्यामिव मालती ॥ ७७५॥
ततः स्वभावाच्चपलां, विपुलां कमलामिमाम् ।
एकान्तेनैतदासक्तं, मूर्खराजं हि मां च धिग् ॥ ७७६॥
उभाभ्यां लब्धमावाभ्यां, देवीपार्श्वाद्यथार्थितम् ।
फले तत्तत्तु वैचित्र्यं, हहाऽभूत्प्राच्यकर्मणा ॥ ७७७॥

---

१. 'क्षुदादिभिः' इत्यपि ।

इति मानसिकाऽनेकदुःखदाहार्द्दिताशयः ।
भवाद्विरक्तः समभूत्सिद्धदत्तश्च तापसः ॥ ७७८॥
धनदत्तमथाहूयेत्यवग् राजा सविस्मयम् ।
बहुलाभेऽपि रत्नानि, श्रेष्ठिन्नात्तानि किं त्वया? ॥ ७७९॥
आशक्रकीटं सर्वत्राऽस्खलितप्रसरः पुनः ।
लोभः स्वचित्ते प्रविशन्, कथं नाम न्यरुध्यत? ॥ ७८०॥
स्वनिर्दोषत्वनिशङ्कः, सोऽप्यवादीत्तदा नृपम् ।
लोभमूलानि पापानि, लोभश्चेद्गुणेन किम् ? ॥ ७८१॥
इत्याद्यनेकशास्त्रार्थान्, मन्त्रवत्स्मरतोऽन्वहम् ।
ममासन्नीभवेल्लोभपिशाचो नहि कर्हिचित् ॥ ७८२॥ युग्मम्॥
अन्यच्च बहुलाभेऽपि, स्तैन्यं स्तैन्याहृतं च यत् ।
त्याज्यं विशुद्धन्यायाध्वाऽध्वनीनैः सर्वथोत्तमैः ॥ ७८३॥
स्वामिन्! सन्तोषमादृत्य, तानि नाऽत्तानि तन्मया ।
ततो निर्लोभताहृष्टः, सच्चक्रे तं भृशं नृपः ॥ ७८४॥
अनासक्ततया सप्तव्यसनेष्वथ सर्वदा ।
शुद्धव्यवहृतौ निष्ठतया सद्धर्म्मवत्तया ॥ ७८५॥
तथ्यपथ्यप्रियोक्तित्वात्सर्वत्रौदार्यतस्तथा ।
वर्द्धमानमहत्त्वर्द्धिः, सोऽभूत्सर्वजनप्रियः ॥ ७८६॥ युग्मम्॥
अथान्यदा नृपसदो, धूर्त्तः कोऽप्यागमत्करे ।
प्रत्येकं कोटिमूल्यानि, पञ्चरत्नानि दर्शयन् ॥ ७८७॥
सावष्टम्भमवक् चैवं, समुद्रेऽस्ति कियज्जलम् ।
कर्द्दमश्च कियानेवं, संशयो हृदि मे चिरात् ॥ ७८८॥
न्यूनाधिकत्वं यः सम्यग्, विद्वान् वेत्त्यनयोर्ध्रुवम् ।
मां च प्रत्याययेत्तस्मै, पञ्चाप्येतान्यहं ददे ॥ ७८९॥

दुर्बोधः संशयस्तस्य, न भग्नस्तत्र केनचित् ।
किंवदन्ती त्वियं नव्या, सर्वत्र प्रासरत्पुरे ॥ ७९० ॥
धनदत्तः पुरक्ष्मापमहत्त्वं रक्षितुं तदा ।
तत्रागात्तत्सुरीदत्तविवेकोत्पन्नसन्मतिः ॥ ७९१ ॥
ऊचे चाब्धौ जलं स्तोकं, भद्र ! भूयांश्च कर्दमः ।
तव चित्ते न चेदत्र, मदुक्ते प्रत्ययो ध्रुवम् ॥ ७९२ ॥
सर्वाः स्रवन्तीर्गङ्गाद्या, निपतन्तीर्निवार्य तत् ।
सिन्धुस्सर्वाम्भसां संख्यां, सावधानमनाः सृज ॥ ७९३ ॥
पश्चात्तदम्बु निःशेषं, पृथक् कृत्वा च वारिधेः ।
पङ्कसंख्यां कुरुष्वात्र, स भूयान् भविता ध्रुवम् ॥ ७९४ ॥
इत्यसाध्यविदग्धोक्तियुक्तिप्रतिहतश्च सः ।
स्वस्य व्रीडाविलक्षास्यो, मन्यमानः पराजयम् ॥ ७९५ ॥
समर्प्योक्तानि रत्नानि, धनदत्ताय सत्वरम् ।
यातो निर्गत्य नगराद्धस्यमानो जनैः क्वचित् ॥ ७९६ ॥ युग्मम् ॥
प्रशस्यमानसद्बुद्धिस्तुष्टेन क्ष्माभुजा भृशम् ।
सत्कृतो धनदत्तश्च, सोत्सवं स्वगृहे ययौ ॥ ७९७ ॥
कश्चिन्महेभ्यसार्थेशवेषभाक् तत्र चाऽन्यदा ।
धूर्त्तोऽथ स्फारशृङ्गारः, सुरूपो नवयौवनः ॥ ७९८ ॥
स्वर्णद्वादशकोटीशाऽनङ्गलेखापणस्त्रियाः ।
रूपसौभाग्यवसतेरागात्सद्मनि गूढहृत्[1] ॥ ७९९ ॥ युग्मम् ॥
तदा नूनं महेभ्योऽयं, कोऽपीत्यावर्जनाय सा ।
स्वानुरागं दर्शयन्ती, जजल्प कपटे पटुः ॥ ८०० ॥

---

1. ગૂઢ હૃદયવાળો.

स्वप्ने मयाद्य त्वत्प्राप्ता, द्वादश[1] स्वर्णकोटयः ।
कल्पद्रुकल्पे सद्माप्ते, सत्यं ह्येतदभूत्त्वयि ॥ ८०१ ॥
धूर्त्तोऽप्यूचे शुभे ! सत्यमेतत्स्वप्नेऽद्य यन्मया ।
द्वादश[2]स्वर्णकोट्यो हि, न्यासे मुक्तास्तवौकसि ॥ ८०२ ॥
सद्भोगसुखलुब्धात्मा, वर्षाणि द्वादशान्वहम् ।
तव वेश्मनि वत्स्यामि, निगद्येति स्फुटाक्षरम् ॥ ८०३ ॥
परं देशान्तरे सार्थश्चलन्नस्त्यधुनोत्सुकः ।
व्यवसाये महाँल्लाभस्तत्र चाप्तवतोऽद्य मे ॥ ८०४ ॥
तत्तत्र गत्वा त्वरितं, बहूपार्ज्य धनं पुनः ।
त्वत्सौभाग्यगुणाकृष्टः, समेष्यामि त्वदौकसि ॥ ८०५ ॥
तेनाद्यार्पय ताः स्वर्णकोटीर्द्वादश सत्वरम् ।
धूर्त्तेनेति ब्रुवाणेन, गृहीता तेन सा करे ॥ ८०६ ॥
किमेतदिति जल्पन्ती, नीता चाशु चतुष्पथम् ।
विवादः स तयोर्भग्नः, सुधियापि न केनचित् ॥ ८०७ ॥
सर्वत्र पूर्वं पण्यस्त्री, हास्यास्पदमियं पुनः ।
वराकी तद्विवादेन, विशिष्याऽजनि निष्कला ॥ ८०८ ॥
तत्कथञ्चित्ततो धूर्त्तविषादान्मुक्तिमिच्छती ।
भृत्यैः पुरान्तः पटहं, सा सर्वत्रेत्यवीवदत् ॥ ८०९ ॥
विवादान्मोचयत्यस्माद्यो मां सम्प्रति सत्पुमान् ।
स मे बन्धुः परस्तस्मै, स्वर्णकोटिं ददे पुनः ॥ ८१० ॥
तत्राऽगाज्ज्ञाततद्वृत्तो, विवेकविकसन्मतिः ।
तयोर्विवादभङ्गार्थं, धनदत्तस्तदा द्रुतम् ॥ ८११ ॥

---

१. 'स्वर्णद्वादशकोटयः' इत्यपि । २. 'स्वर्णद्वादशकोट्यो हि' इत्यपि ।

पाणिस्थद्वादशस्वर्णकोटिमूल्यमहामणिः ।
दर्शयन्वामपाणिस्थादर्शे तान्प्रतिबिम्बितान् ॥ ८१२ ॥ युग्मम् ॥
धूर्त्तमूचे च लाह्येतान्, विमुञ्चैतां पणस्त्रियम् ।
सोऽप्याख्यदेतैरादर्शबिम्बितैः करवाणि किम् ? ॥ ८१३ ॥
धनदत्तोऽप्युवाचैवं, यादृशी भद्र ! भावना ।
सिद्धिर्हि तादृशी यादृग्, देवः पात्री च तादृशी ॥ ८१४ ॥
त्वया स्वप्नेऽर्पितं यादृगस्या अप्यनया धनम् ।
प्रत्यर्प्यमाणं चाद्यास्ते, तादृक् ते प्रतिबिम्बितम् ॥ ८१५ ॥
न दोषः कश्चिदत्रेति, स धूर्त्तोऽथ निरुत्तरः ।
यथागतमगाद्व्रीडाविलक्षस्त्वरितं क्वचित् ॥ ८१६ ॥
निर्मुक्ताऽर्थे ततो मिथ्याविवादान्मुदिताशया ।
धनदत्ताय सा स्वर्णकोटिं समधिकां ददौ ॥ ८१७ ॥
एवं प्रवर्धमानर्द्धिर्धनदत्तः स धीनिधिः ।
षट्पञ्चाशत्स्वर्णकोटीस्वामी समजनि क्रमात् ॥ ८१८ ॥
अथान्येद्युः पुरे तत्र, क्रव्यात्[1]कोऽप्यागमद्बली ।
गृहीतश्च नृपस्तेन, प्राप्तः प्रान्तदशां द्रुतम् ॥ ८१९ ॥
नभःस्थो न्यगदत्सोऽथ, क्रव्यादो यदि कोऽपि मे ।
ददाति बलिमात्मानं, तन्मुञ्चे नृपतिं ध्रुवम् ॥ ८२० ॥
अमात्यप्रमुखाः सर्वे, तदुक्तं कर्त्तुमक्षमाः ।
सत्त्वहीनतया ह्रीणाः, पौरा नीचैर्व्यलोकयन् ॥ ८२१ ॥
परोपकृतिनिष्णातो, धनदत्तस्तदा ददे ।
रक्षसे बलिमात्मानं, क्ष्मापरक्षाचिकीः[2] स्वयम् ॥ ८२२ ॥

1. રાક્ષસ 2. રાજાની રક્ષા કરવાની ઈચ્છાવાળો

तत्सत्त्वतुष्टः क्रव्यादो, विमुच्याऽथ नृपं द्रुतम् ।
तस्मै च द्वादश स्वर्णकोटीर्दत्त्वा तिरोदधे ॥ ८२३॥

कश्चिद्व्यन्तरजातीयो, मांसाशी नहि कर्हिचित् ।
किन्त्वीदृग् याचते नूनं, सत्त्वमेवेक्षितुं नृणाम् ॥ ८२४॥

कृतज्ञोऽथ स भूजानिरतीवात्मोपकारिणम् ।
धनदत्तं व्यधान्मुख्यं, सर्वत्र व्यवहारिषु ॥ ८२५॥

भद्रकप्रकृतिः प्रायः, पापभीरुमनाः सना ।
सौम्यदृष्टिः स भूजानिरिति पालयति प्रजाः ॥ ८२६॥

अथाऽन्यदा वसन्तर्त्तौ, सान्तःपुरपरिच्छदः ।
जग्मिवान्बहिरुद्याने, स नृपः केलिकौतुकी ॥ ८२७॥

तत्र यावच्च मध्याह्ने, सूपकारैर्नृपाज्ञया ।
नानारसवतीपाकः, क्रियमाणोऽस्ति सोद्यमम् ॥ ८२८॥

तावत्क्षुत्तृड्भृशग्लानाः, सार्थभ्रष्टा महर्षयः ।
केचिदीयुस्त्रिभिर्घस्त्रैस्[1]तत्रोल्लंङ्घ्य महाटवीम् ॥ ८२९॥

साऽनुकम्पहृदा राज्ञा, वल्लभाभिश्च तस्य ते ।
तदा तन्दुलनीरेण, प्रासुकेन निमन्त्रिताः॥ ८३०॥

समयोपनतं शुद्धं, तद्विज्ञायाददेऽद्य तैः।
विलोक्यमानं तत्रैकनान्दीभाजनपूरकम् ॥ ८३१॥

तत्रैवासन्नवृक्षस्य, च्छायायामेत्य सत्वरम् ।
पीयूषमिव तत्पीत्वा, स्वास्थ्यमापुर्महर्षयः ॥ ८३२॥

उपदेशमथ श्रुत्वा, तत्रैत्य स नृपः क्षणम् ।
लघुकर्मा प्रपेदानः, श्राद्धधर्म्मं प्रियायुतः ॥ ८३३॥

---

1. दिनैः

सश्रद्धाराद्धसुश्राद्धधर्मः काले मृतोऽथ सः ।
रत्नपाल ! प्रजापाल! भवान् भाग्यैकभूरभूत् ॥ ८३४॥
दुःखदाहोत्थवैराग्य(ः)सिद्धदत्तः स तापसः ।
अज्ञानकष्टः क्रियया, जयामात्योऽभवत्पुनः ॥ ८३५॥
तदा लोभेन तत्पोतं, द्वादशाऽहानतिष्ठिपः ।
तद्वैरात्सोऽत्र ते राज्यं, वर्षाणि द्वादशाऽग्रहीत् ॥ ८३६॥
ऋणं वैरं द्वयं चैतन्नृभिर्मौर्ख्यादुपेक्षितम् ।
जन्मकोटिसहागामि, नहि जीर्यति कर्हिचित् ॥ ८३७॥
तेषामध्यवसायस्य, विशेषादन्यजन्मनि ।
भूत्वा शतसहस्रादिगुणं तच्चोपतिष्ठते ॥ ८३८॥
जीवस्तु धनदत्तस्य, श्राद्धो वैदेशिकोऽभवत् ।
प्राच्योपकाराद् ग्लानत्वे, यं तदा प्रत्यजागरीः॥ ८३९॥
यश्च त्वत्कारितप्रान्ताराधनानशनक्रियः ।
सुरीभूतः कृतज्ञत्वादुपचक्रे तदा तदा ॥ ८४०॥
प्राच्यपत्न्यो नवाप्यत्र, स्नेहादेत्य तवाऽमिलन् ।
नीरदानोल्लसद्भोगसत्कर्मसहभुक्तये ॥ ८४१॥
श्रीदेवी चाऽभवत्तासु, राज्ञी शृङ्गारसुन्दरी ।
यच्च जन्मसहस्रात्प्राक्, तारुण्योन्मत्तया तया ॥ ८४२॥
हास्येनाच्छोटितो धूल्या, कायोत्सर्गस्थितो मुनिः ।
नानाविडम्बनाश्चास्या, जातास्तेनाऽत्र जन्मनि ॥ ८४३॥युग्मम्॥
रे कुष्ठिन् ! न करोष्येतन्मदुक्तं किमु सत्वरम् ?।
भृत्यः कनकमञ्जर्येत्याक्रुष्टः प्राच्यजन्मनि ॥ ८४४॥

इत्थं च गुणमञ्जर्या, रे किमन्ध ! न पश्यसि ? ।
तत्तद्व्याधिरभूदत्र, तत्तत्कर्म फलं तयोः ॥ ८४५ ॥
आक्रोश्यैवं च यत्ताभ्यां, विदधेऽनुशयो मनाक् ।
तेनापीदृग्विधो व्याधिरुपशान्तः पुनस्तयोः ॥ ८४६ ॥
यदेकतुम्बकमितं, निर्दोषं तन्दुलोदकम् ।
समये श्रद्धया दत्तं, सुसाधुभ्यस्तदा त्वया ॥ ८४७ ॥
सर्वार्थसाधकमिदं, तत्तेऽभूद्रसतुम्बकम् ।
निःसपत्नं च साम्राज्यं, सदोदित्वरसन्महः ॥ ८४८ ॥
वृत्तं प्राच्यभवस्येदृक्, सम्यक् सर्वविदो मुखात् ।
निशम्य सप्रियो राजा, जातिस्मरणमाप सः ॥ ८४९ ॥
यथोक्तं तेन तद्वृत्तं, वीक्ष्य साक्षादिवाऽखिलम् ।
प्राप्तश्चाऽभङ्गवैराग्यं, चेतस्येवमचिन्तयत् ॥ ८५० ॥
दुःखैकसारे संसारे, संसरद्भिः शरीरिभिः ।
भुक्ता ह्यनन्तशस्तृष्णातरलैर्विषयाः पुरा ॥ ८५१ ॥
तथापीह भृशासक्तिभृतस्तेष्वेव ही ! जडाः ।
आचरन्त्यार्हतं धर्म्मं, न प्रेत्य हितमात्मनः ॥ ८५२ ॥
शरत्कालाऽभ्रपटलं, विलीयेताऽनिलाद्यथा ।
मन्ये तथात्र संसारे, सर्वं क्षणविनश्वरम् ॥ ८५३ ॥
कल्लोललोला कमला, पुनरत्रेष्टसङ्गमाः ।
मार्गस्थतरुविश्रान्तसार्थसंयोगसन्निभाः ॥ ८५४ ॥
आपातमधुराः सर्वे, विषयाः प्रान्तदारुणाः ।
रम्भान्तरिव[1] संसारे, सारं किञ्चिन्न वीक्ष्यते ॥ ८५५ ॥

1. કેળનો અંદરનો ભાગ

क्षणदृष्टविनष्टत्वात्स्वप्नः सर्वमिदं भुवि ।
एको भवति सुप्तानां, द्वितीयो जाग्रतां पुनः ॥ ८५६ ॥

प्रतिक्षणमयं कायः, क्षीयमाणो न लक्ष्यते ।
वारिमुक्तामघटवद्विशीर्णः स विभाव्यते ॥ ८५७ ॥

आयुर्नासाग्रसञ्चारिनिःश्वासोच्छ्वासकैतवात् ।
अत्यन्तगमनायेव, सदाऽभ्यासे कृतोद्यमम् ॥ ८५८ ॥

येभ्यो जाताश्चिरात्तावत्ते गताः स्वसमानपि ।
पश्यन् प्रयातो मरणं, हन्तात्मायमनाकुलः ॥ ८५९ ॥

यदुक्तम्—

*"वयं येभ्यो जाताश्चिरतरगता एव खलु ते,*
*समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः ।*
*इदानीमेते स्मः प्रतिदिनसमासन्नपतना,*
*गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः" ॥ 52 ॥*

चिरं स्थित्वाऽपि विषयाः प्रयास्यन्ति न संशयः ।
तस्मादेते स्वयं त्यक्ता, वरं सुखकृतो हि ते ॥ ८६० ॥

यदुक्तम्—

*"अवश्यं यातारश्चिरतरमुषित्वाऽपि विषया,*
*वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।*
*व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः,*
*स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति" ॥ 53 ॥*

*( नीतिशतक )*

तदसारेऽत्र संसारे, विहाय विषयान्तरम् ।
संगृह्णीत सुधीर्द्धर्मं, सारं सर्वज्ञभाषितम् ॥ ८६१ ॥

इत्याशु विषयाशंसाविरक्तो विमलाशयः ।
रत्नपालनृपः सोऽभूत्प्रवज्याग्रहसाग्रहः ।। ८६२ ।।
आर्पिताः परमां प्रौढिं, तेन सत्कृत्य सद्गुणैः ।
प्रधानामात्यसामन्ताः, सखेदं तं तदोचिरे ।। ८६३ ।।
त्वदेकजीविताः स्वामिंस्त्वत्तः कल्पद्रुमाच्च्युताः ।
वयं सुमनसो नूनं, भविष्यामः कथं हहा!? ।। ८६४ ।।
इयानन्तःपुरं[1]जनो, नानाभोगोचितः कथम्? ।
भावीत्युक्तस्त्वया मूर्द्धभ्रष्टके शकलापवत् ।। ८६५ ।।
न्यायनिष्ठ ! गुणश्रेष्ठ !, त्वया पालितपोषिताः ।
लप्स्यन्तेऽमूः प्रजा मातापितृसौख्यं कुतोऽन्यतः? ।। ८६६ ।।
सम्मोहोद्दीपनैरित्यादिभिर्वाक्यैस्तदीरितैः ।
वैराग्ये सुस्थिरं राज्ञो, नाऽकम्पत मनो मनाक् ।। ८६७ ।।
सोऽथ मेघरथं पुत्रं, प्रतिरूपमिवात्मनः ।
निवेश्य राज्ये राजन्यसमक्षमनुशिष्य च ।। ८६८ ।।
श्री मज्जिनमतोद्द्योतं, चिकीर्षुः सर्वतो जने ।
कृत्वा प्रियाभिः सहितश्चैत्येष्वष्टाह्निकामहम् ।। ८६९ ।।
दीनादिभ्यो ददद्दानं, पुत्रक्लृप्तैर्महामहैः ।
महासेनमुनेः पार्श्वे, प्रव्रज्यां, प्रतिपन्नवान् ।। ८७० ।।।। त्रिभिर्विशेषकम् ।।
चारित्रं निरतीचारं, शुचिचित्तः समा[2]चरत् ।
तपोऽथ दुस्तपं तप्त्वा, कालेऽभूत्स सुरो महान् ।। ८७१ ।।
देवर्द्धिमद्भुतां भुक्त्वा, सचिरं दिवि सप्रियः ।
महाविदेहे मानुष्यं, प्राप्य सेत्स्यति चाऽचिरात् ।। ८७२ ।।
निस्समानसमृद्धीनां, निदानं दानमुज्ज्वलम् ।
इति मत्वा मनःशुद्ध्या, यतध्वं तत्र सत्तमाः ।। ८७३ ।।

१. 'पुरीवर्गो' इत्यपि । २. 'समाचरन्' इत्यपि ।

## अथ प्रशस्तिः

आसंस्तपागणेशाः श्रीसोमसुन्दरसूरयः ।
युगप्रधानास्तत्पट्टे, सूरिश्रीमुनिसुन्दराः ॥ ८७४ ॥
तेनिवांस्तत्पदाम्भोजभ्रमरः सोममण्डनः ।
एतां स्वाऽन्योपकाराय, दानमाहात्म्यसत्कथाम् ॥ ८७५ ॥
एषा प्रसद्य धीमद्भिः, शोधनीया शुभाशयैः ।
वाचनीया च सुचिरं, श्रेयःशर्मकृतस्पृहैः ॥ ८७६ ॥
मुनिसुन्दरसूरीशपट्टे विजयिनोऽधुना ।
श्रीरत्नशेखर गणाधीशा वः शिवसम्पदे ॥ ८७७ ॥

इति श्रीतपागच्छाधिराजश्रीसोमसुन्दरसूरिपट्टप्रभाकर-
गच्छनायकश्रीमुनिसुन्दरसूरिविनेयवाचनाचार्य-
श्रीसोममण्डनगणिकृता
सत्पात्रपानीयदाने श्रीरत्नपालनृपकथा समाप्ता ॥

# परिशिष्ट- १ विशेषनाम सूची


| नाम | श्लोकाङ्कः |
|---|---|
| **(अ)** | |
| अजितनाथ | ५४४ |
| **(आ)** | |
| आशासिद्धि | ५७० |
| आषाढभूति | ३० |
| **(इ)** | |
| इलातीसुत | ३१ |
| **(क)** | |
| कुडङ्कुण | ७७ |
| कनकमञ्जरी | ४१० |
| कनकावली | ४१० |
| कमलश्री | ४७९ |
| कर्णाटजा | ८१ |
| काशी | ७३ |
| कुशल | ६३९ |
| कौशाम्बीपुरी | ४७३ |
| **(ख)** | |
| खस | ८१ |
| **(ग)** | |
| गगनवल्लभ | २१९ |
| गन्धर्वसेना | ३८५ |
| गुणमञ्जरी | ४१० |
| गौड | ८१ |
| गौर्जर | ८१ |
| **(द)** | |
| दामोदर | ४७४ |
| देवसेना | ३८५ |
| दृढप्रहारी | २३ |
| **(ध)** | |
| धनदत्त | ५६७ |
| धनश्री | १७५ |
| धनसार | १७५ |
| धनसार्थेश | ७ |
| **(न)** | |
| नन्दिषेण | ४५ |
| नन्दीश्वर | २२० |
| नारद | १४ |
| **(प)** | |
| पत्रवल्ली | २९४ |
| पाटलीपुर | ६० |
| प्रसनन्नचन्द्र | ३२ |
| **(ब)** | |
| बलवाहन | २३४ |
| **(भ)** | |
| भरत | २८ |
| भरतक्षेत्र | ६० |
| **(म)** | |
| मधु | ७५ |
| मधुपघ्न | ७५ |
| महाबल | २९३ |
| महासेन | ४५६ |
| महासेन | ८७१ |
| महाराष्ट्रज | ८१ |
| मातङ्ग | ३१ |
| मालव | ८१ |
| मुग्धभट्ट | ४७२ |
| मूलस्थानपुर | २३१ |
| मेघरथ | ४५१ |
| मेघरथ | ८६९ |
| मोहवल्ली | २९४ |
| **(य)** | |
| श्री युगादीश | २ |
| **(र)** | |
| रतिश्री | ७५० |
| रत्नपाल | ४९ |
| रत्नपुर | ४०७ |
| रत्नपुर | ४६५ |
| रत्नवती | २३५ |
| रत्नवीर | ५६५ |
| रत्नसेन | ४०७ |
| **(ल)** | |
| लाट | ८१ |
| **(व)** | |
| वल्लभ | २१९ |
| विनयपाल | ६३ |
| विमल | ४९७ |
| विमला | ४८१ |
| विश्वावसु | ३८४ |
| वीरसेन | ६६ |
| वृन्दावन | ७६ |
| वैताढय | २१९ |
| **(श)** | |
| शालिग्राम | ४७३ |
| शालिभद्र | ६ |
| श्री देवी | ४६६ |
| शृङ्गादत्त | ६०८ |
| शृङ्गारसुन्दरी | ६६ |
| श्रेणिक | २४ |
| **(स)** | |
| सिद्धदत्त | ५६७ |
| सीता | १३ |
| सीमन्धरस्वामी | २१ |
| सुदर्शन | १२ |
| सुभद्रा | १३ |
| सुलक्षणा | ४७२ |
| सूरसेन | ७३ |
| सोमा | ४७४ |
| सौभाग्यमञ्जरी | २५३ |
| स्थानाङ्ग | १३२ |
| **(ह)** | |
| हंसपुर | ६६ |
| हेमाङ्गद | २२० |

# परिशिष्ट – २

## उद्धृतश्लोकानामकारादिक्रम


| श्लोक नं. | | पृ. नं. |
|---|---|---|
| | **अ** | |
| १३ | अकाण्डकोपिनो... | ११ |
| ३६ | अज्ञः सुखमाराध्य... | ५४ |
| ४ | अथिरंपि थिरं.... | ३ |
| ३४ | अप्पा चेव... | ४९ |
| २५ | अर्वाग्दृष्टितया... | १३ |
| ५३ | अवश्यं यातार... | ८६ |
| ४६ | अश्वप्लुतं माधव... | ६६ |
| | **इ** | |
| ४३ | इन्द्रत्वेऽपि हि... | ६३ |
| | **उ** | |
| ४० | उत्तिष्ठ क्षणमेक... | ६२ |
| २६ | उत्तिष्ठन्तो निवार्यन्ते... | २८ |
| २२ | उत्सवव्यसनयोः... | २४ |
| २३ | उपकृत्योपकार्येषु... | २६ |
| | **ए** | |
| ९ | एकस्य सिद्धि... | ७ |
| २९ | एगप्पा अजिए... | ४७ |
| २८ | एगे जिए... | ४७ |
| | **क** | |
| १ | कलिकारओवि... | २ |
| ४० | कल्लोलैः सह... | ६७ |
| ४५ | किंशुके किं... | ६४ |
| ४२ | कोटीश्वरो नरेन्द्रत्वं... | ६२ |
| | **ख** | |
| ३३ | खरकरहतुरयवसहा... | ४८ |
| | **घ** | |
| ७ | घन दत्तं... | ५ |
| | **च** | |
| १६ | चिरं पितृगृहे... | १७ |
| ५१ | चौरश्चौरापक... | ७७ |
| | **छ** | |
| २१ | छिन्नोऽपि रोहति... | २४ |
| | **ज** | |
| ३८ | जहा लाहो तहा... | ६१ |
| ३ | जितेन्द्रियत्वं विनयं... | ३ |
| ८ | जोगे जोगे.... | ६ |
| ३२ | जो सहस्सं... | ४८ |
| | **त** | |
| ३५ | तृष्णाखानिरगाधेयं... | ६१ |
| | **द** | |
| ३० | दस दस... | ४८ |
| ५ | दीप्यमाने तपोवह्नौ | ४ |
| १७ | दुष्टस्य दण्ड... | १८ |
| २७ | द्विघटं ग्रहिला.. | ३९ |
| | **ध** | |
| ४१ | धनहीनः शतमेकं... | ६२ |
| | **न** | |
| २ | नवि किञ्चि अणुन्नायं... | ३ |
| | **प** | |
| ३१ | पइदिवसं दस... | ४८ |
| ३५ | पैशाचिकमाख्यानं.. | ५३ |
| ४७ | प्राप्तुं यारम.... | ६६ |
| | **ब** | |
| १२ | बह्वप्यश्रद्धया... | ८ |
| | **भ** | |
| ६ | भरिऊण जलं... | ५ |
| | **म** | |
| ४९ | मंनो निब्बद्धं... | ६७ |
| २४ | मृगेण दत्तां... | २ |
| | **य** | |
| ३७ | यथा यथा पूर्वकृतस्य | ५९ |
| | **व** | |
| ४२ | वयं येभ्यो... | ८६ |
| ४४ | विना कदर्यं... | ६४ |
| २५ | विराध्यते न... | २८ |
| ४८ | विहिविलसिआण... | ६६ |
| ११ | व्याजे स्याद... | ८ |
| | **स** | |
| १४ | सञ्चारिणी दीपशिखे.. | ११ |
| १८ | सम्पदि परोऽपि.. | २३ |
| १० | सर्वत्र ददतो... | ८ |
| २० | सुखदुःखानां... | २४ |
| १९ | सुखस्य दुःखस्य... | २४ |

सं. पु. (

## ધર્મકથાઓ શા માટે ?

ધર્મ જ કલ્યાણને કરનારો છે. ધર્મ ને જાણનારો ધર્મ કરે છે. અને ધર્મને તે જાણે છે કે જે શ્રી સર્વજ્ઞ પરમાત્માએ કહેલી ધર્મકથાને મધ્યસ્થભાવે અને કુશલપણે સાંભળે છે તે જણાવી ધર્મકથાને કહેવાનો હેતુ સ્પષ્ટ કરવામાં આવ્યો છે. વિચારો ! કે ધર્મકથા મહાપુરુષોએ લખી, તે શા માટે? અને મહાપુરુષોએ લખેલી ધર્મકથાને અમે કહીએ છીએ તે પણ શા માટે? એજ માટે કે આ સાંભળીને સૌ કોઈ ધર્મને જાણે અને ધર્મને જીવનમાં ઉતારે. સીધેસીધું તત્ત્વનું સ્વરૂપ સમજનારા વિરલ આત્માઓ જ હોય છે. જ્યારે કથા દ્વારા તત્ત્વ સમજવામાં સુલભતા રહે છે. પણ કથા કહેવાનો અને સાંભળવાનો હેતુ, કહેનાર અને સાંભળનાર બરાબર જાળવે તો. કથા ભાટ જેવી પ્રણ નહિ થવી જોઈએ અને ભટ જેવી પણ નહિ થવી જોઈએ એક હસાવે અને એક લોભાવે, કથા તો તત્ત્વજ્ઞાની એ કહેલી અને તત્ત્વજ્ઞાનને પમાડનારી હોવી જોઈએ. ધર્મકથા તે. કે જે વસ્તુને વસ્તુગતે સમજાવે. તમે કેવળ કથાના રસીયા ન બનો અને ધર્મના રસીયા બનો. તો કથામાં પણ તત્ત્વજ્ઞાનની રેલમછેલ થાય. ધર્મની કથા એટલે સંવેગરસથી ઝીલતી કથા યોગ્ય શ્રોતાઓ એ કથાનું શ્રવણ કરતા કરતા પણ સંવેગરસમાં ઝીલે. ત્યારે વાત એ છે કે ધર્મગુણ પમાય. એમાં જ કથા શ્રવણની સાર્થકતા છે.

વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા

(-સિરિમઈ સમરાઈચ્ચ કહા ભા-૧ )

सूरिमंत्र पंच प्रस्थान समाराधक ग्रंथश्रेणि क्रमांक-९२



શ્રી સ્મૃતિમંદિર પ્રકાશન ટ્રસ્ટ- અમદાવાદ